125
2

अथ

"याज्ञवल्क्यस्मृतिः"।

~~Yagnat~~

Yadnya Valkya Smriti

6 125/2 X १८२

याज्ञवल्क्यस्मृतिः

वाहस्तु समंत्रकः १३ गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनं राज्ञामेकादशे सैके विशामेके यथाकुलं १४ उपनीय
गुरुः शिष्यं महाव्याहृतिपूर्वकं वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् १५ दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्-
मुखः कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः १६ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः गंधलेपक्षयकरं शौ-
चं कुर्यादतंद्रितः १७ अंतर्जानुः शुचौ देश उपविष्ट उदङ्मुखः प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् १८ क-
निष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य तु प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् १९ त्रिः प्राश्यापो द्विरुन्मृज्य खा-
न्यद्भिः समुपस्पृशेत् अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः २० हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः
शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः २१ स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयमः सूर्यस्याचाप्युपस्थानं
गायत्र्याः प्रत्यहं जपः २२ गायत्रीं शिरसा सार्धं जपेद्व्याहृतिपूर्विकां प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः २३
प्राणानायम्य संप्रोक्ष्य तृचेनाब्दैवतेन तु जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् २४ संध्यां प्राक् प्रातरेवं
हि तिष्ठेदासूर्यदर्शनात् अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि २५ ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन्

३ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः ॥ यमापस्तंबसंवर्ताःकात्यायनबृहस्पती ४ पराशरव्याससंखलिता
दक्षगोतमौ ॥ शातातपोवसिष्ठश्च धर्मशास्त्रप्रयोजकाः ५ खि

(इतिधर्ममूलप्रकरणं ६)

श्रीगणेशायनमः योगीश्वरंयाज्ञवल्क्यंसंपूज्यमुनयोब्रुवन् ॥ वर्णाश्रमेतराणांनोब्रूहिधर्मानशेषतः १ मिथिलास्थःसयो
गींद्रःक्षणंध्यात्वाब्रवीन्मुनीन् यस्मिन्देशेमृगःकृष्णस्तस्मिन्धर्मान्निबोधत २ पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रि
ताः वेदाःस्थानानिविद्यानांधर्मस्यचचतुर्दश ३ वक्तारोधर्मशास्त्राणांमनुर्विष्णुर्यमोगिराः वसिष्ठदक्षसंवर्तशातात
पपराशराः ४ आपस्तंबोशनोव्यासाःकात्यायनबृहस्पती गौतमःशंखलिखितौहारीतोत्रिरहंतथा ५ देशेकालेउ
पायेनद्रव्यंश्रद्धासमन्वितं पात्रेप्रदीयतेयत्तत्सकलंधर्मलक्षणं ६ श्रुतिःस्मृतिःसदाचारःस्वस्यचप्रियमात्मनः
सम्यक्संकल्पजःकामोधर्ममूलमिदंस्मृतं ७ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां अयंतुपरमोधर्मोयद्योगे
नात्मदर्शनं ८ चत्वारोवेदधर्मज्ञाःपर्षत्त्रैविद्यमेववा साब्रूतेयंसधर्मःस्यादेकोवाध्यात्मवित्तमः ९ इत्युपोद्घातप्रकर
णं ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वाद्यास्त्रयोद्विजाः निषेकाद्याःश्मशानांतास्तेषांवैमंत्रतःक्रियाः १० गर्भाधानमृ
तौपुंसःसवनंस्पंदनात्पुरा षष्ठेष्टमेवासीमंतोमास्येतेजातकर्मच ११ अहन्येकादशेनामचतुर्थेमासिनिष्क्रमः
षष्ठेन्नप्राशनंमासिचूडाकार्यायथाकुलं १२ एवमेनःशमंयातिबीजगर्भसमुद्भवं तूष्णीमेताःक्रियाःस्त्रीणांवि

गुरौचैवाप्युपासीतस्वाध्यायार्थसमाहितः २६ आहूतश्चाप्यधीयीतलब्धंचास्मैनिवेदयेत् हितंतस्याचरेन्नित्यंमनोवाक्का
यकर्मभिः २७ कृतज्ञाद्रोहिमेधाविशुचिकल्यानसूयकाः अध्याप्याधर्मतःसाधुशक्ताप्तज्ञानवित्तदाः २८ दंडाजिनो
पवीतानिमेखलांचैवधारयेत् ब्राह्मणेषुचरेद्भैक्षमनिंद्येष्वात्मवृत्तये २९ आदिमध्यावसानेषुभवच्छब्दोपलक्षि
ता ब्राह्मणक्षत्रियविशांभैक्षचर्यायथाक्रमं ३० कृताग्निकार्योभुंजीतवाग्यतोगुर्वनुज्ञया आपोशनक्रियापूर्वंस
त्कृत्यान्नमकुत्सयन् ३१ ब्रह्मचर्येस्थितोनैकमन्नमद्यादनापदि ब्राह्मणःकाममश्नीयात्श्राद्धेव्रतमपीडयन् ३२
मधुमांसांजनोछिष्टशुक्तस्त्रीप्राणिहिंसनं भास्करालोकनाश्लीलपरिवादादिवर्जयेत् ३३ सगुरुर्यःक्रियाःकृत्वावे रु
दमस्मैप्रयछति उपनीयददद्वेदमाचार्यःसमुदाहृतः ३४ एकदेशमुपाध्यायऋत्विग्यज्ञकृदुच्यते एतेमान्याययथापू
र्वमेभ्योमातागरीयसी ३५ प्रतिवेदंब्रह्मचर्यंद्वादशाब्दानिपंचवा ग्रहणांतिकमित्येकेकेशांतश्चैवषोडशे ३६ आ
षोडशात्द्वाविंशाच्चचतुर्विंशाच्चवत्सरात् ब्रह्मक्षत्रविशांकालऔपनायनिकःपरः ३७ अतऊर्ध्वंपतंत्येतेसर्वध
र्मबहिष्कृताः सावित्रीपतितावात्याव्रात्यस्तोमादृतेक्रतोः ३८ मातुर्यदग्रेजायंतेद्वितीयंमौंजिबंधनात् ब्राह्मण

शुक्तंनिष्ठुरवाक्यंनानारसाः ५

गोदानाख्यंकर्म ३

५ वाकोवाक्यंनाम प्रश्नोत्तररूपं वेदवाक्यं पुराणं ब्राह्मादि चका
५ रान्मानवादिधर्मशास्त्रं नाराशंसीः रुद्रदैवत्यान् मंत्रान् गाथा यज्ञ
गाथेन्द्रगाथाद्याः
५ वारुण्याद्या विद्याः
शक्त्याधीते हि योन्वहं ५

या॰स्मृ॰ क्षत्रियविट्तस्मात्द्वितेद्विजाःस्मृताः ३९ यज्ञानांतपसांचैव शुभानांचैवकर्मणां वेदएवद्विजातीनांनिःश्रेयसकरःप
२ रः ४० मधुनापयसाचैवसदेवांस्तर्पयेद्विजः पितॄन्मधुघृताभ्यांच ऋचोधीतेहियोन्वहं ४१ यजूंषिशक्तितोधीते
योन्वहंसघृतामृतैः प्रीणातिदेवानाज्येनमधुनाचपितॄंस्तथा ४२ सतुसोमघृतैर्देवांस्तर्पयेद्योन्वहंपठेत् सामा[illegible]नि
तृप्तिंकुर्याच्चपितॄणांमधुसर्पिषा ४३ मेदसातर्पयेद्देवानथर्वांगिरसःपठेत् पितॄंश्चमधुसर्पिर्भ्यामन्वहंशक्तितो
द्विजः वाकोवाक्यंपुराणंचनाराशंसीश्चगाथिकाः इतिहासांस्तथाविद्यां[illegible]धीतेशक्तितोद्विजः ४५ मांसक्षीरोदनमधुतर्पणं
सदिवौकसां करोतितृप्तिंचतथापितॄणांमधुसर्पिषा ४६ तेतृप्तास्तर्पयंत्येनंसर्वक[illegible]फलैः यंयंक्रतुमधीयीतत शुभैः
स्यतस्याप्नुयात्फलं ४७ त्रिर्वित्तपूर्णपृथिवीदानस्यफलमश्नुते तपसश्चपरस्येहनित्यंस्वाध्यायवान्द्विजः ४८ नैष्ठिकोब्र
ह्मचारीचवसेदाचार्यसन्निधौ तदभावेस्यतनयेपत्न्यांवैश्वानरेपिवा ४९ अनेनविधिनादेहंसाधयन्विजितेंद्रियः
ब्रह्मलोकमवाप्नोतिनचेहाजायतेपुनः ५० इतिब्रह्मचारिप्रकरणं॥ ॥गुरवेतुवरंदत्वास्नायीततदनुज्ञया वेदव्रतानिवा २
पारंनीत्वाह्युभयमेववा १ अविप्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेत् अनन्यपूर्विकांकांतामसपिंडांयवीयसीं २ अ

अप्रकाशितमानसव्यभिचारज
पापस्य ऋतौ शुद्धिः न तु पुरुषसंयोगजस्य

णीया पतिं हित्वा सवर्णं कामतः श्रयेत् १७ अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया सपिंडो वा सगोत्रो वा घृताभ्यक्त ऋ
या॰स्मृ॰ तावियात् १८ आगर्भसंभवाद्गच्छेत्पतितस्त्वन्यथा भवेत् अनेन विधिना जातः क्षेत्रजस्तु भवेत्सुतः १९ हृताधिकारां म
२ लिनां पिंडमात्रोपजीविनीं परिभूतामधःशय्यां वासयेद्व्यभिचारिणीं २० सोमः शौचं ददौ स्त्रीणां गंधर्वश्च शुभां गिरं पा
वकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः २१ व्यभिचाराहतौ शुद्धिर्गर्भे त्यागो विधीयते गर्भभर्तृवधादौ च तथा महति पातके
विसंवादिनी २२ सुरापी व्याधिता धूर्ता वंध्यार्थघ्न्यप्रियंवदा स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा २३ अधिविन्ना तु भर्त्तव्या मह
देनोऽन्यथा भवेत् यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्धते २४ मृते जीवति वा पत्यौ या नान्यमुपगच्छति सेह कीर्तिमवाप्नोति
मोदते चोमया सह २५ आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः २६ स्त्रीभि
र्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः २७ लोकानंत्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः
यस्मात्तस्मात्स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः २८ षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् ब्रह्मचार्येव पर्वा २
ण्याद्याश्चतस्रश्च वर्जयेत् २९ एवं गच्छन्स्त्रियं क्षामां मघां मूलं च वर्जयेत् सुस्थ इंदौ सकृत्पुत्रं लक्षण्यं जनयेत्सुतं ३०
पुमां

यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन् स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः ३१ भर्तृभ्रातृपितृज्ञातिश्वश्रूश्व
शुरदेवरैः बंधुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ३२ संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी कुर्याच्छ्वशुरयोः पादवंद
नं भर्तृतत्परा ३३ क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनं हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ३४ रक्षेत्कन्यां पिता विन्नां प
तिः पुत्रास्तु वार्धके अभावे ज्ञातयस्तेषां स्वातंत्र्यं न क्वचित्स्त्रियाः ३५ पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः हीना न स्याद्वि
नी नाभर्त्रा गर्हणीयान्यथा भवेत् ३६ पतिप्रियहिते युक्ता स्वाचारा विजितेंद्रिया इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिं सत्या
मन्यां सवर्णायां धर्मकार्यं न कारयेत् सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः आह
रेद्विधिवद्दारानग्नींश्चैवाविलंबयन् ३९ इति विवाहप्रकरणं सवर्णेभ्यः सवर्णासु जायंते हि सजातयः अनिंद्येषु विवाहे
षु पुत्राः संतानवर्धनाः १ विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियां अंबष्ठः शूद्र्यां निषादो जातः पारशवोऽपि वा २ वैश्या
शूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः ३ ब्राह्मण्यां क्षत्रियात्सूतो वैश्या
द्वैदेहिकस्तथा शूद्राज्जातस्तु चंडालः सर्वधर्मबहिष्कृतः ४ क्षत्रिया मागधं वैश्या शूद्रात्क्षत्तारमेव च शूद्रादायोगवं वैश्या

या॰ स्मृ॰ कानयामासवैस्कृतं ५ माहिष्येणकरण्यांतुरथकारःप्रजायते असत्संतस्तु विज्ञेयाः प्रतिलोमानुलोमजाः ६
जात्युत्कर्षो युगे ज्ञेयः सप्तमे पंचमेपिवा व्यत्यये कर्मणांसाम्यं पूर्ववच्चाधरोत्तरं ७ इतिजातिवर्णविवेकप्रकरणं ॥
४ कर्मस्मार्त्तं विवाहाग्नौ कुर्वीत प्रत्यहंगृही दायकालाहृते वापि श्रौतं वैतानिकाग्निषु ८ शरीरचिंतांनिर्वर्त्य कृतशौचविधि
र्द्विजः प्रातःसंध्यामुपासीत दंतधावनपूर्विकां ९ हुत्वाग्नीन्सूर्यदैवत्यान्जपेन्मंत्रान्समाहितः वेदार्थानधिगच्छेच्च शा
स्त्राणिविविधानिच १० उपेयादीश्वरंचैव योगक्षेमार्थसिद्धये स्नात्वादेवान्पितॄंश्चैव तर्पयेदर्चयेत्तथा ११ वेदाथर्वपुरा
णानिसेतिहासानिशक्तितः जपयज्ञप्रसिध्यर्थं विद्यामाध्यात्मिकींजपेत् १२ बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्
क्रियाः भूतपित्रमरब्रह्ममनुष्याणांमहामखाः १३ देवेभ्यश्च हुतादन्नाच्छेषाद्भूतबलिंहरेत् अन्नंभूमौश्वचांडालवाय
सेभ्यश्च निक्षिपेत् १४ अन्नंपितृमनुष्येभ्योदेयमप्यन्वहंजलं स्वाध्यायंसततंकुर्यान्नपचेदन्नमात्मने १५ बालस्ववा दत्तभ्रतीः
सिनीवृद्धगर्भिण्यातुरकन्यकाः संभोज्यातिथिभृत्यांश्च दंपत्योःशेषभोजनं १६ अपोशानेनोपरिष्टादधस्तादश्नतस्तथा ४
तथा अनग्नममृतंचैव कार्यमन्नंद्विजन्मना १७ अतिथित्वेन वर्णानां देयंशक्त्यानुपूर्वशः अप्रणोद्योतिथिःसायमपि
अप्रत्याख्येयः परिणीतापितृगेहे स्थितास्ववासिनी

श्वित्रकुष्ठापस्मारप्रभृतयः शुक्रशोणितद्वारेणानुप्रविशंतः दोषाहीनक्रियादयः

जिह्वांभ्रातृमतीमसमानार्षगोत्रजां पंचमात्सप्तमादूर्ध्वंमातृतःपितृतस्तथा ३ दशपूरुषविख्याताच्छ्रोत्रियाणांमहाकु
लात् स्फीतादपिनसंचारिरोगदोषसमन्वितात् ४ एतैरेवगुणैर्युक्तःसवर्णःश्रोत्रियोवरः यत्नात्परीक्षितःपुंस्त्वेयुवाधीमा
ञ्जनप्रियः ५ यदुच्यते द्विजातीनांशूद्राद्दारोपसंग्रहः नैतन्ममतंयस्मात्तत्रात्माजायतेस्वयं तिस्रोवर्णानुपूर्व्येण द्वेतथै
सवर्णा वै का यथाक्रमं ब्राह्मणक्षत्रियविशांभार्यास्वाशूद्रजन्मनः ७ ब्राह्मोविवाहआहूय दीयतेशक्त्यलंकृता तज्जःपुनात्युभयतःपु
रुषानेकविंशतिं ८ यज्ञस्थऋत्विजेदैवआदायार्षस्तुगोद्वयं चतुर्दशप्रथमजःपुनात्युत्तरजश्चषट् ९ इत्युक्त्वाचरतांधर्मंसह सहधर्मं चरतां मितिपरिभाष्य
यादीयतेर्थिने सकायःपावयेत्तज्जः षट्षड्वंश्यान्सहात्मना १० आसुरोद्रविणादानाद्गांधर्वःसमयान्मिथः राक्षसोयुद्धह
रणात्पैशाचःकन्यकाछलात् ११ पाणिर्ग्राह्यःसवर्णासुगृह्णीयात्क्षत्रियाशरं वैश्याप्रतोदमादद्याद्वेदनेत्वग्रजन्मनः १२ पिता
पितामहोभ्रातासकुल्योजननीतथा कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः १३ अप्रयच्छन्समाप्नोतिभ्रूणहत्यामृतावृतौ ग गम्यन्त्वभावे दातॄणांकन्याकुर्यात्स्वयंवरं १४ सकृत्प्रदीयतेकन्याहरंस्तांचौरदंडभाक् दत्तामपिहरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत् १५ सप्तमपदा प्राग्गिस्यर्थः
अनाख्यायददद्दोषंदंड्यउत्तमसाहसं अदुष्टांचत्यजन्दंड्योदूषयंस्तुमृषाशतं १६ अक्षताचक्षताचैवपुनर्भूःसंस्कृतापुनः स्वैरि
उपे
अनन्यपूर्वा द्विधापुनर्भूः स्वैरिणी चेति पुनर्भूरपि द्वेधा क्षता चाक्षताच संस्कारात्प्राक्पुरुषसंबंधाक्षता पुनः संस्कारदूषिता तु अक्षता

मपिवाग्भूतृणोदकैः १८ सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्रताय च भोजयेच्चागतान्काले सखिसंबंधिबां
धवान् १९ महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत् सत्क्रियान्वासनं स्वादु भोजनं सूनृतं वचः २० प्रतिसंवत्स
रं त्वर्घ्याः स्नातकाचार्यपार्थिवाः प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः २१ अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपा
रगः मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः २२ परपाकरुचिर्न स्यादनिंद्यामंत्रणादृते वाक्पाणिपादचापल्यं
वर्जयेच्चातिभोजनं २३ अतिथिं श्रोत्रियं तृप्तमासीमांतमनुव्रजेत् अहःशेषं सहासीत शिष्टैरिष्टैश्च बंधुभिः २४ उपास्य प
श्चिमां संध्यां हुत्वाग्नींस्तानुपास्य च भृत्यैः परिवृतो भुक्त्वा नातितृप्त्याथ संविशेत् २५ धर्ममर्थं च कामं च यथाशक्ति न
हापयेत् ब्राह्मे मुहूर्ते उत्थाय चिंतयेदात्मनो हितं धर्मार्थकामान्स्वे काले यथाशक्ति न हापयेत् २६ विद्याकर्मवयोबंधुवि
त्तैर्मान्या यथाक्रमं [illegible] एतैः प्रभूतैः शूद्रोऽपि वार्धके मानमर्हति २७ वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणां [illegible] पंथा देयो
२८ नृपस्तेषां मान्यः स्नातश्च नृपतेः ॥ इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च [illegible] प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा २९
प्रधानं क्षत्रिये कर्म प्रजानां परिपालनं [illegible] कुसीदं कृषिवाणिज्यं पाशुपाल्यं विशः स्मृतं ३० शूद्रस्य द्विजशुश्रूषा तयाजीवन

या॰स्मृ॰ णि ग्भवेत् शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन् २० भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियारतः नमस्कारेण मंत्रेण
५ पंचयज्ञान्नहापयेत् २१ अहिंसासत्यमस्तेयं शौचमिंद्रियनिग्रहः दानं दमो दयाक्षांतिः सर्वेषां धर्मसाधनं २२ वयोबुध्य
र्थवाग्वेषश्रुताभिजनकर्मणां आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथा २३ त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद्द्विजः ५
प्राक्सौमिकीः क्रियाः कुर्याद्यस्यान्नं वार्षिकं भवेत् २४ प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा कर्तव्याग्रयणेष्टिश्च
चातुर्मास्यानि चैव हि २५ एषामसंभवे कुर्यादिष्टिं वैश्वानरीं द्विजः हीनकल्पं न कुर्वीत सति द्रव्ये फलप्रदं चंडालो जायते
यज्ञकरणाच्छूद्रभिक्षितात् यज्ञार्थलब्धमददद्भासः काकोऽथवा भवेत् २७ कुसूलकुंभीधान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा
जीवेद्वापि शिलोंछेन श्रेयानेषां परः परः ॥ २८ ॥ इति गृहस्थप्रकरणं ॥ ॥ न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः
न विरुद्धप्रसंगेन संतोषी च भवेत्सदा १ राजांतेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा दंभिहैतुकपाषंडिबकवृत्तींश्च
वर्जयेत् २ शुक्लांबरधरो नीचकेशश्मश्रुनखः शुचिः न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः ३ न संशयं प्रपद्ये
त नाकस्मादप्रियं वदेत् नाहितं नानृतं चैव न स्तेनः स्यान्न वार्धुषी दाक्षायणी ब्रह्मसूत्री वेणुमान्सकमंडलुः कु ५

२दाक्षायणसुवर्ण

यात्प्रदक्षिणंदेवमृद्गोविप्रवनस्पतीन्ःनतुमेहेन्नदीछायावर्त्मगोष्ठांबुभस्मसु ॥ नप्रत्यग्न्यर्कगोसोमसंध्यांबु
स्त्रीद्विजन्मनां नेक्षेतार्कं ननग्नांस्त्रींनचसंसृष्टमैथुनां नचमूत्रपुरीषेचनाशुचीराहुतारके अयंमेवज्रइत्येवंसर्वंमंत्रमुदी
रयेत् ॥ वर्षत्यप्रावृतोगच्छेत्स्वपेत्प्रत्यक्शिरानच ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सुननिक्षिपेत् ॥ पादौप्रतापयेन्नाग्नौ
न नचैवमतिलंघयेत् जलंपिबेन्नांजलिनानशयानंप्रबोधयेत् ॥ नाक्षैःक्रीडेतधर्मघ्नैर्व्याधितैर्नहिसंविशेत् ५० विरुद्धंवर्जये
त्कर्मप्रेतधूमंनदीतरं ॥ केशभस्मतुषांगारकपालेषुचसंस्थितिं ५१ नाचक्षीतधयंतींगांनाद्वारेणविशेत्क्वचित् ॥ नराज्ञःप्र
तिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः प्रतिग्रहेसूनिचक्रिध्वजिवेश्यानराधिपाः ॥ दुष्टादशगुणंपूर्वात्पूर्वादेतेयथाक्रमं ५२ अ
ध्यायानामुपाकर्मश्रावण्यांश्रवणेनच ॥ हस्तेनौषधिभावेवापंचम्यांश्रावणस्यतु ५३ पौषमासस्यरोहिण्यामष्टकायामथा
पिवा ॥ जलांतेछंदसांकुर्यादुत्सर्गंविधिवद्बहिः ५४ त्र्यहंप्रेतेष्वनध्यायःशिष्यर्त्विग्गुरुबंधुषु ॥ उपाकर्मणिचोत्सर्गेस्व
शाखाश्रोत्रियेतथा ५५ संध्यागर्जितनिर्घातभूकंपोल्कानिपातने ॥ समाप्यवेदंद्युनिशमारण्यकमधीत्यच ५६ पंचदश्यांच
तुर्दश्यामष्टम्यांराहुसूतके ॥ ऋतुसंधिषुभुक्त्वावाश्राद्धिकंप्रतिगृह्यच ५७ पशुमंडूकनकुलश्वाहिमार्जारसूकरैः ॥ कृ
तेंतरेत्वहोरात्रंशक्रपातेतथोच्छ्रये ५८ श्वक्रोष्टुगर्दभोलूकसामबाणार्तनिःस्वने ॥ अमेध्यशवशूद्रांत्यश्मशानपतितांति

ऋतुसंधिगतासुचप्रतिपत्सु

या॰स्मृ॰ के॰१ देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे ॥ भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रेऽतिमारुते ॥४५॥ पांसुवर्षे दिशांदाहे संध्यानी
६ हारभीतिषु ॥ धावतः पूतिगंधे च शिष्टे च गृहमागते ॥४६॥ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे ॥ सप्तत्रिंशदनध्यायानेतांस्ता
त्कालिकान्विदुः ॥४७॥ देवर्त्विक्स्नातकाचार्यराज्ञांछायांपरस्त्रियाः ॥ नाक्रमेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनादि च ॥४८॥ विप्राहिक्षत्रियात्मा
नो नावज्ञेयाः कदाचन ॥ आमृत्योः श्रियमाकांक्षेन्न कंचिन्मर्मणि स्पृशेत् ॥४९॥ दूरादुच्छिष्टविण्मूत्रपादांभांसि समुत्सृजेत् ॥
श्रुतिस्मृत्युदितं सम्यङ्नित्यमाचारमाचरेत् ॥५०॥ गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत् ॥ न निंदाताडने कुर्यात्पुत्रं शिष्यं
च ताडयेत् ॥५१॥ अधोभागे शरीरस्य नोत्तमांगे न वक्षसि ॥ अतोऽन्यथा ताडयन्हि नरः पापेन युज्यते ॥५२॥ कर्मणा मनसा वाचा यत्नाद्ध
र्मं समाचरेत् ॥ अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु ॥५३॥ मातृपित्रतिथिभ्रातृजामिसंबंधिमातुलैः ॥ वृद्धबालातु
राचार्यवैद्यसंश्रितबांधवैः ॥५४॥ ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः ॥ विवादं वर्जयित्वा तु सर्वाँल्लोकाञ्जयेद्गृही ॥५५॥ पं
च पिंडाननुद्धृत्य न स्नायात्परवारिषु ॥ स्नायान्नदीदेवखातगर्तप्रस्रवणेषु च ॥५६॥ परशय्यासनोद्यानगृहयानानि वर्जयेत् ॥
अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि ॥५७॥ कदर्यबद्धचौराणां क्लीबरंगावतारिणां ॥ वैणाभिशस्तवार्धुष्यगणिकाग ६
णदीक्षिणां ॥५८॥ चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां ॥ क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनां ॥५९॥ अवीरास्त्रीस्वर्णकारस्त्री

ग्र

जितात्यामयाजिनां ॥ शस्त्रविक्रयिकर्मारतंतुवायश्ववृत्तिनां ॥ नृशंसराजरजककृतघ्नवधजीविनां ॥ चै
लधावकसुराजीवसहोपपतिवेश्मनां ॥ एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा पिशुनानृतिनां चैव तथा चाक्रिक
वंदिनां ॥ इति स्नातकप्रकरणं ॥ गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः ॥ पिशुनानृतिनश्चैव तथाचा
क्रिकबंदिनां ॥ अनर्चितं वृथामांसं केशकीटसमन्वितं शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितं ७८ उ
दक्यास्पृष्टसंघुष्टं पर्यायान्नं च वर्जयेत् ॥ शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः ॥ भोज्यान्ना नापितश्चैव
यश्चात्मानं निवेदयेत् ॥ अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितं ॥ अस्नेहा अपि गोधूमयवगोरसविक्रि
याः ॥ संधिन्यनिर्दशावत्सागोपयः परिवर्जयेत् ॥ औष्ट्रमेकशफं स्त्रैणमारण्यकमथाविकं ॥ देवतार्थं ह
विः शिग्रुलोहितान्व्रश्चनांस्तथा ॥ अनुपाकृतमांसानि विड्जानि कवकानि च ॥ क्रव्यादपक्षिदात्यूहशुकप्रतुद
टिट्टिभान् ॥ सारसैकशफान्हंसान्सर्वांश्च ग्रामवासिनः ॥ कोयष्टिप्लवचक्राह्वबलाकाबकविष्किरान् ॥ दृ

द्वि

भ२

या.स्मृ. वृथाकृशरसंयावपायसापूपशष्कुलीः ८५ कलविंकसकाकोलकुररंरज्जुदालकं जालपादंखंजरीटमज्ञातां
७ श्चमृगद्विजान् ८६ चाषांश्चरक्तपादांश्चसौनंवल्लूरमेवच मत्स्यांश्चकामतोजग्ध्वासोपवासस्त्र्यहंवसेत् ८७ पलांडुंवि
दु ड्वराहंचछत्राकंग्रामकुक्कुटं लशुनंगृंजनंचैवजग्ध्वाचांद्रायणंचरेत् ८८ भक्ष्याःपंचनखाःसेधागोधाकच्छपश
ल्यकाः शशश्चमत्स्येष्वपिहिसिंहतुंडकरोहिताः ८९ तथापाठीनराजीवसशल्काश्चद्विजातिभिः अतःशृणुध्वं
मांसस्यविधिंभक्षणवर्जने ९० प्राणात्ययेतथाश्राद्धेप्रो तद्द्विजकाम्यया देवान्पितॄन्समभ्यर्च्यखादन्मांसंनदोष
भाक् ९१ वसेत्सनरकेघोरेदिनानिपशुरोमभिः संमितानिदुराचारोयोहंत्यविधिनापशून् ९२ सर्वान्कामानवाप्नोतिह
यमेधफलंतथा गृहेपिनिवसन्विप्रोमुनिर्मांसविवर्जनात् ९३ इतिभक्ष्याभक्ष्यप्रकरणं सौवर्णराजताब्जाना
मूर्ध्वपात्रग्रहाश्मनां शाकरज्जुमूलफलवासोविदलचर्मणां १ पात्राणांचमसानांचवारिणाशुद्धिरिष्यते चरु ७
स्रुक्स्रुवसस्नेहपात्राण्युष्णेनवारिणा २ स्फ्यशूर्पाजिनधान्यानांमुसलोलूखलानसां प्रोक्षणंसंहतानांचबहू

जि ना२

या॰स्मृ॰ आचांतः पुनराचामेद्वासो विपरिधाय च १५ रथ्याकर्दमतोयानि स्पृष्टान्यंत्यश्ववायसैः मारुतेनैव शुद्ध्यंति
८ पक्वेष्टकचितानि च १६ इति द्रव्यशुद्धिप्रकरणं तपस्तप्त्वासृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये तृप्त्यर्थं पितृदेवा
नां धर्मसंरक्षणाय च १ सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योप्यध्यात्म
वित्तमाः २ न विद्यया केवलया तपसा वापि पात्रता यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते ३ गोभूतिलहिरण्यादि
पात्रे दातव्यमर्चितं नापात्रे विदुषा किंचिदात्मनः श्रेय इच्छता ४ विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः गृह्णन्प्रदा
तारमधो नयत्यात्मानमेव च ५ दातव्यं प्रत्यहं पात्रे निमित्ते तु विशेषतः याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः ६
हेमशृंगी शफै रौप्यैः सुशीला वस्त्रसंयुता सकांस्यदोहा दातव्या क्षीरिणी गौः सदक्षिणा ७ दशसौवर्णिकं शृंगं शफाः
पंचपलीनकाः पंचाशत्पलिकं पात्रमृषिभिः परिकीर्तितं ८ स्वर्णपित्तलपात्राणि वस्त्रो वापि सितोपि वा तस्यां वि ८
धिवद्दातव्यमपत्यं रोमवर्जितं ९ सवत्सारोमतुल्यानि युगान्युभयतोमुखी दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना

ददत् १० यावद्वत्सस्य पादौ द्वौ मुखं योन्यां च दृश्यते तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुंचति ११ यथाकथंचि
द्दत्वा गां धेनुं वाधेनुमेव वा अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते १२ श्रांतसंवाहनं रोगिपरिचर्या सुरार्चनं पाद
शौचं द्विजोच्छिष्टमार्जनं गोप्रदानवत् १३ भूमिदीपान्नवस्त्रांभस्तिलसर्पिः प्रतिश्रयान् नैवेशिकं स्वर्णधुर्यं दत्वा स्व
र्गमवाप्नुयात् १४ गृहधान्याभयोपानच्छत्रमाल्यानुलेपनं यानं वृक्षं प्रियं शय्यां दत्वात्यंतं सुखी भवेत् १५ सर्व
दानमयं ब्रह्म प्रदानेभ्योधिकं यतः प्रददत्सर्वमाप्नोति ब्रह्मलोकमविच्युतं १६ प्रतिग्रहसमर्थोपि नादत्ते यः प्रतिग्रहं
ये लोका दानशीलानां स तानाप्नोति पुष्कलान् १७ कुशाः शाकं पयो मत्स्या गंधाः पुष्पं दधि क्षितिः मांसं शय्यासनं धा
नाः प्रत्याख्येयं न वारि च १८ अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः अन्यत्र कुलटाषंढपतितेभ्यस्तथा द्विषः १९
देवतातिथ्यर्चनकृते गुरुभृत्यार्थमेव वा सर्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेव च २० इति दानप्रकरणं अमावास्याष्ट
का वृद्धिः कृष्णपक्षोयनद्वयं द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः २१ व्यतीपातो गजच्छाया ग्रहणं चंद्रसूर्ययोः श्राद्धं

या॰स्मृ॰ प्रतिरुचिश्चैवश्राद्धकालाः प्रकीर्त्तिताः २ अग्र्याः सर्वेषुवेदेषुश्रोत्रियोब्रह्मविद्युवा वेदार्थविज्ज्येष्ठसामा त्रिमधु
त्रिसुपर्णकाः ३ स्वस्रीयऋत्विकजामातृयाज्यश्वशुरमातुलाः त्रिनाचकेतदौहित्रशिष्यसंबंधिबांधवाः ४ कर्मनि
ष्ठास्तपोनिष्ठाः पंचाग्निब्रह्मचारिणः पितृमातृपराश्चैवब्राह्मणाः श्राद्धसंपदि ५ रोगीहीनातिरिक्तांगः काणः पौनर्भ
वस्तथा अविकिर्णीकुंडगोलौकुनखीश्यावदंतकः ६ (द्विर्नग्नो बिविधिः श्वित्री विद्धप्रजननोगदः वाग्दुष्टः कालदम
कोवणिगायुधजीविकः ७) भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः मित्रध्रुक्पिशुनः सोमविक्रयीपरिविंदकः
८ मातापितृगुरुत्यागीकुंडाशीवृषलात्मजः परपूर्वापतिः स्तेनः कर्मदुष्टाश्चनिंदिताः ९ निमंत्रयेतपूर्वेद्युर्ब्राह्मणाना
त्मवान्शुचिः ~~निमंत्रितेश्चवेतैर्भाव्यं वाङ्मनःकायसंयुतैः~~ ११ अपराह्णेसमभ्यर्च्यस्वागतेनागतांस्तुतान् पवित्रपाणि
राचांतानासनेषूपवेशयेत् ११ द्वैवेयुग्मान्यथाशक्ति पित्र्ये युग्मांस्तथैवहि परिश्रितेशुचौदेशेदक्षिणाप्रवणेतथा १२ ९
कृ॰त्रयः१ द्वौदैवेप्राक् [illegible] पित्र्ये [illegible] एकैकमेववा मातामहानामप्येवंतंत्रंवावैश्वदेविकं १३ पाणिप्रक्षालनंदत्वा विष्टरार्थं कुशान्
दे

नैश्चापिसंयुतैर्भाव्यं मनोवाक्कायकर्मभिः
उदगे

कं
आविकं ऊर्णामयं कौशं शणप्रभवंत सरीपटादि वल्कलतंतु हतं पर्वतीयछागरोमनिर्मितः कंबलः

नांचैववाससां ३ तक्षणंदारुशृंगास्थ्नांगोवालैःफलसंभुवां मार्जनंयज्ञपात्राणांपाणिनायज्ञकर्मणि ४
सोषरुदकगोमूत्रैः शुध्यत्याविककौशिकं सश्रीफलैरंशुपट्टं सारिष्टैः कुतपंतथा ५ सगौरसर्षपैः क्षौमंपुनःपाका
न्महीमयं कारुहस्तः शुचिः पण्यंभैक्ष्यंयोषिन्मुखंतथा ६ भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणादपि सेकादुल्लेख
नाल्लेपाद्गृहंमार्जनलेपनात् ७ गोघ्रातेन्नेतथाकेशमक्षिकाकेशदूषिते सलिलंभस्म मृद्वाप्रक्षिप्तव्यंविशुद्धये ८ पि
त्रपुसीसकताम्राणांक्षाराम्लोदकवारिभिः भस्माद्भिः कांस्यलोहानांशुद्धिःप्लावोद्रवस्यतु ९ अमेध्याक्तस्यमृत्तोयैः
शुद्धिर्गंधापकर्षणात् वाक्शस्तमंबुनिर्णिक्तमज्ञातंचसदाशुचि १० शुचिगोतृप्तिकृत्तोयंप्रकृतिस्थंमहीगतं तथामां
सं श्वचांडालक्रव्यादादिनिपातितं ११ रश्मिरग्निरजश्छायागौरश्वोवसुधानिलः विप्रुषोमक्षिकास्पर्शेवत्सः प्रस्नवने
शुचिः १२ अजाश्वंमुखतोमेध्यंनगोर्ननरजामलाः पंथानश्चविशुध्यंतिसोमसूर्यांशुमारुतैः १३ मुखजाविप्रुषोमे
ध्यास्तथाचमनबिंदवः श्मश्रुचास्यगतंदंतसक्तंत्यक्त्वाततःशुचिः १४ स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्याप्रसर्पणे॥

विश्वेदेवाश्च प्रीयंतां विप्रैश्चोक्ते इदं जपेत् २

या०स्मृ० णामुखः उछिष्टसन्निधौ पिंडान्दद्याद्वै पितृयज्ञवत् २६ मातामहानामप्येवं दद्यादाचमनं ततः स्वस्तिवाच्यं त

१० तः कुर्याद् अक्षय्योदकमेव च २७ दत्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत् वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः ते

र स्वधोच्यतां २८ ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिंचेत्ततो जलं प्रीयतामिति ब्रूहित्वं विश्वेदेवा जलं ददत् २९ दाता

रो नोऽभिवर्धंतां वेदाः संततिरेव च श्रद्धा च नो माव्यगमद्बहुदेयं च नोऽस्त्विति ३० (अन्नं च नो बहु भवेदतिथींश्च लभे

महि याचितारश्च नः संतु मा च याचिष्म कंचन) इत्युक्त्वा च प्रिया वाचः प्रणिपत्य विसर्जयेत् ३१ वाजे वाजे इति प्रीतः पि

तृपूर्वं विसर्जयेत् ३२ यस्मिंस्ते संस्रवाः पूर्वं अर्घपात्रे निवेशिताः पितृपात्रं तदुत्तानं कृत्वा विप्रान्विसर्जयेत् ३३ प्र

पितृ दक्षिणमनुव्रज्य भुंजीत पितृसेवितं ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह ३४ एवं प्रदक्षिणावृत्को वृद्धौ नांदी

मुखान्पितॄन् यजेत दधिकर्कंधुमिश्रान्पिंडान्यवैः क्रियाः ३५ एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकं आवाहनाग्नौक १०

रणरहितं ह्यपसव्यवत् ३६ उपतिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जने अभिरम्यतामिति वदेद्ब्रूयुस्तेऽभिरताः स्मह ३७

त्य द्ब्रू

सर्वकामानाप्नोति श्राद्धदः सदा ॥

गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रसिंचयेत् ३८ ये समाना इति द्वाभ्यां

शेषं पूर्ववदाचरेत् एतत्सपिंडीकरणमेकोद्दिष्टं स्त्रिया अपि ३९ अर्वाक्सपिंडीकरणं यस्य संवत्सराद्भवेत् तस्या

प्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजे ४० मृतेहनि च कर्तव्यं प्रतिमासं तु वत्सरं प्रतिसंवत्सरं चैवमाद्यमेकादशेहनि

४१ पिंडांस्तु गोजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा प्रक्षिपेत्सत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत् ४२ हविष्यान्नेन वै

ग मासं पायसेन तु वत्सरं मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ४३ ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं मास

वृद्ध्याभितृप्यंति दत्तैरिह पितामहाः ४४ खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च लोहामिषं कालशाकं मांसं वार्ध्री

णसस्य च ४५ यद्ददाति गयास्थश्च सर्वमानंत्यमश्नुते तथा वर्षात्रयोदश्यां मघासु च विशेषतः ४६ कन्यां क

न्यावेदिनश्च पशून्वै सत्सुतानपि द्यूतं कृषिं च वाणिज्यं द्विशफैकशफांस्तथा ४७ ब्रह्मवर्चस्विनः पुत्रान्स्वर्ण

रौप्ये सकुप्यके ज्ञातिश्रैष्ठ्यं सौभाग्यं समृद्धिं मुख्यतां शुभं ४८ प्रवृत्तचक्रतां चैव वाणिज्यप्रभृतीनपि अरोगि

प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीं ॥ शस्त्रेण वा हता ये वै तेभ्यस्तत्र प्रदीयते। स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं

तथा॥ पुत्रं श्रैष्ठ्यं ससौभाग्यं समृद्धिं मुख्यतां शुभं ॥

सुवर्णरजतव्यतिरिक्तं त्रपुसीसादि कुप्यं

 त्वयस्ते वीतशोकतां परमां गतिं ४९ धनं वेदान्भिषक्सिद्धिं कुप्यंज गावप्यजाविकं अश्वानायुश्च विधि
 वद्यः श्राद्धं संप्रयच्छति ५० कृत्तिकादिभरण्यंतं सकामानाप्नुयादिमान् आस्तिकः श्रद्दधानश्च व्यपेतमदमत्स
रः ५१ वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः प्रीणयंति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः ५२ आयुः प्रजां ध
नं विद्यां स्वर्गं मोक्षं सुखानि च प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहाः ५३ इति श्राद्धप्रकरणं विनायकः
कर्मविघ्नसिद्ध्यर्थं विनियोजितः गणानामाधिपत्येन रुद्रेण ब्रह्मणा तथा १ तेनोपसृष्टो यस्तस्य लक्षणानि नि
बोधत स्वप्नेवगाहतेत्यर्थं जलं मुंडांश्च पश्यति २ काषायवाससश्चैव क्रव्यादांश्चाधिरोहति अंत्यजैर्गर्दभैरु
ष्ट्रैः सहैकत्रावतिष्ठते ३ व्रजन्नपि तथात्मानं मन्यतेनुगतं परैः विमना विफलारंभः संसीदत्यनिमित्ततः ४ तेनो
पसृष्टो लभते न राज्यं राजनंदनः कुमारी न च भर्त्तारमपत्यं गर्भमंगना ५ आचार्यत्वं श्रोत्रियश्च न शिष्योध्यय
नं तथा वणिक्लाभं न चाप्नोति कृषिं चापि कृषीवलः ६ स्नपनं तस्य कर्त्तव्यं पुण्येह्नि विधिपूर्वकं गौरसर्षपकल्के 

पि आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा १४ यवैरन्ववकीर्याथ भाजने सपवित्रके शंनोदेव्या पयः क्षिप्त्वा
यवोसीति यवांस्तथा १५ या दिव्या इति मंत्रेण हस्ते त्वर्घ्यं विनिक्षिपेत् दत्वोदकं गंधधूपंमाल्यंदानं सदीपकं १६ अप
सव्यं ततः कृत्वा पितॄणामप्रदक्षिणं द्विगुणांस्तु कुशान्दत्वा उशंतस्त्वेत्यृचा पितॄन् १७ आवाह्य तदनुज्ञातो जपेदायां
कुर्यादर्घादि तु नस्ततः यवार्थास्तु तिलैः कार्याः ~~[illegible]~~ च पूर्ववत् १८ दत्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः पितृभ्यः स्था
नमसीति न्युब्जं पात्रं करोत्यधः १९ अग्नौ करिष्यन्नादाय पृच्छत्यन्नं घृतप्लुतं कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञव
त् २० हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः यथालाभोपपन्नेषु रौप्येषु च विशेषतः २१ दत्वान्नं पृथिवीपात्रमिति
पात्राभिमंत्रणं कृत्वेदं विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत् २२ सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचं जप्त्वा यथासुखं
वाच्यं भुंजीरंस्तेपि वाग्यताः २३ अन्नमिष्टं हविष्यं च दद्यादक्रोधनोत्वरः आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वजपं तथा २४
अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च तदन्नं विकिरेद्भूमौ दद्याच्चापः सकृत्सकृत् २५ सर्वमन्नमुपादाय सतिलं दक्षि

जयं

या॰ स्मृ॰ दकं एतान्सर्वान्समाहृत्य भूमौ कृत्वा ततः शिरः १९ विनायकस्य जननीमुपतिष्ठेत्ततोंबिकां दूर्वासर्षपपुष्पा
१२ णां दत्वार्घ्यं पूर्णमंजलिं रूपंदेहि यशोदेहि भगंभवति देहि मे पुत्रान्देहि धनंदेहि सर्वान्कामांश्चदेहि मे २१ ततः शु
क्लांबरधरः शुक्लमाल्यानुलेपनः ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मंगुरोरपि २२ एवंविनायकंपूज्य ग्रहांश्चैवविधानतः
कर्मणां फलमाप्नोति श्रियंचाप्नोत्यनुत्तमां २३ आदित्यस्य सदा पूजां तिलकंस्वामिनस्तथा महागणपतेश्चैवकु
र्वन्सिद्धिमवाप्नुयात् २४ इतिगणपतिकल्पः श्रीकामः शांतिकामो वा ग्रहयज्ञं समाचरेत् वृष्ट्यायुःपुष्टिका
मोवा तथैवाभिचरन्नपि १ सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः शुक्रःशनैश्चरो राहुः केतुश्चेति ग्रहाः क्र
मात् २ स्ववर्णैर्वा पटे लेख्या गंधैर्मंडलकेषु वा यथावर्णं प्रदेयानि वासांसि कुसुमानि च ३ गंधाश्च बलयश्चैव
धूपोदेयश्च गुग्गुलुः कर्त्तव्या मंत्रवंतश्च चरवः प्रतिदैवतं ४ आकृष्णेन इमंदेवा अग्निर्मूर्धा दिवः ककुत् उद्बुध्यस्वे १२
ति चऋचो यथासंख्यं प्रकीर्त्तिताः ५ बृहस्पते अति यदर्यस्तथैवान्नात्परिस्रुतः शंनोदेवीस्तथा कांडात्केतुंकृण्व

ताम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ ॥ रजतादयसः
सीसात्कांस्यात्कार्या ग्रहाः क्रमात् ॥३॥

न्निमांस्तथा ६ अर्कः पलाशः खदिरस्त्वपामार्गोथ पिप्पलः उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात् ७
एकैकस्यात्राष्टशतमष्टाविंशतिरेव वा होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः ८ गुडोदनं पायसं च हविष्यं
क्षीरषाष्टिकं दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च ९ दद्याद्ग्रहक्रमादेतद्द्विजेभ्यो भोजनं बुधः शक्तितो वा य
थालाभं सत्कृत्य विधिपूर्वकं १० धेनुः शंखस्तथानड्वान्हेम वासो हयः क्रमात् कृष्णा गौरायसं छाग एता वै
दक्षिणाः स्मृताः ११ यश्च यस्य यदा दुःस्थः स तं यत्नेन पूजयेत् ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ १२
ग्रहाधीना नरेंद्राणामुच्छ्रायाः पतनानि च भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः १३ इतिग्रहशांतिप्रकरणं
महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः विनीतः सत्वसंपन्नः कुलीनः सत्यवाक्शुचिः १ अदीर्घसूत्रः स्मृति
मानक्षुद्रोपरुषस्तथा धार्मिकोव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् २ स्वरंध्रगोप्तान्वीक्षिक्यां दंडनीत्यां तथैव च
विनीतस्त्वथ वार्त्तायां त्रय्यां चैव नराधिपः ३ समंत्रिणः प्रकुर्वीत प्राज्ञान्मौलान्स्थिरान्शुचीन् तैः सार्धं चिंत

या॰स्मृ॰

१३

येद्राज्यंविप्रेणाथततःस्वयं ४ पुरोहितंचकुर्वीतदैवज्ञमुदितोदितं दंडनीत्यांचकुशलमथर्वांगिरसे
तथा ५ श्रौतस्मार्तक्रियाहेतोर्वृणुयादेवचर्त्विजः यज्ञांश्चैवप्रकुर्वीतविधिवद्भूरिदक्षिणान् ६ भोगांश्चद
त्वाविप्रेभ्योवसूनिविविधानिच अक्षयोयंनिधीराज्ञांयद्विप्रेषूपपादितं ७ अस्कन्नमव्यथंचैवप्रायश्चि
तं त्तैरदूषितं अग्नेःसकाशाद्विप्राग्नौहुतंश्रेष्ठमिहोच्यते ८ अलब्धमीहेद्धर्मेणलब्धंयत्नेनपालयेत् पा
लितंवर्धयेन्नीत्यावृद्धंपात्रेषुनिक्षिपेत् ९ दत्वाभूमिंनिबंधंवाकृत्वालेख्यंतुकारयेत् आगामिभद्रनृपति
परिज्ञानायपार्थिवः १० पटेवाताम्रपट्टेवास्वमुद्रोपरिचिन्हितं अभिलेख्यात्मनोवंश्यानात्मानंचमहीपतिः
११ प्रतिग्रहपरीमाणंदानछेदोपवर्णनं स्वहस्तकालसंपन्नंशासनंकारयेत्स्थिरं १२ रम्यंपशव्यमाजी
व्यंजांगलंदेशमावसेत् तत्रदुर्गाणिकुर्वीतजनकोशात्मगुप्तये १३ तत्रतत्रचनिष्णातानध्यक्षान्कुशलान्शु
चीन् प्रकुर्यादायकर्मांतव्ययकर्मसुचोद्यतान् १४ नातःपरतरोधर्मोनृपाणांयद्रणार्जितं विप्रेभ्योदीयतेद्रव्यं १३

ध्र

नसाज्येनोत्साहितस्यच ७ सर्वौषधैःसर्वगंधैर्विलिप्तशिरसस्तथा भद्रासनोपविष्टस्यस्वस्तिवाच्या
द्विजाःशुभाः ८ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् मृत्तिकांरोचनांगंधान्गुग्गुलुंचाप्सुनिक्षिपेत् ९
याआहृताह्येकवर्णाश्चतुर्भिःकलशैर्ह्रदात् चर्मण्यानडुहेरक्ते स्थाप्यंभद्रासनंततः १० सहस्राक्षंशतधारमृषिभिः
पावनंकृतं तेनत्वामभिषिंचामिपावमान्यःपुनंतुते ११ भगंतेवरुणोराजाभगंसूर्योबृहस्पतिः भगमिंद्रश्चवायु
श्चभगंसप्तर्षयोददुः १२ यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्धनि ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुसर्वदा १३ स्नात
स्यसार्षपंतैलंस्रुवेणौदुंबरेणतु जुहुयान्मूर्धनिकुशान्सव्येनपरिगृह्यच १४ तश्चसंमितश्चैवतथाशालकटंकटौ
कूष्मांडोराजपुत्रश्चेत्यंतेस्वाहासमन्वितैः १५ नामभिर्बलिमंत्रैश्चनमस्कारसमन्वितैः दद्याच्चतुष्पथेशूर्पे
कुशानास्तीर्यसर्वतः १६ कृताकृतांस्तंडुलांश्चपललौदनमेवच मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेवतु १७ पु
ष्पंचित्रंसुगंधंचसुरांचत्रिविधामपि मूलकंपूरिकापूपांस्तथैवोंडेरकास्रजः १८ दध्यन्नंपायसंचैवगुडपिष्टंसमो

सर्वदानाधिकं यस्मात्प्रजानां परिपालनं ॥

या. स्मृ. परिपालने च चाटतस्करदुर्वृत्तमहासाहसिकादिभिः २७ पीड्यमानाः प्रजा रक्षेत्कायस्थैश्च विशेषतः
१४ अरक्ष्यमाणाः कुर्वंति यत्किंचित्किल्बिषं प्रजाः २८ तस्मात्तु नृपतेरर्धं यस्माद्गृह्णात्यसौ करान् ये राष्ट्राधि
कृतास्तेषां चारैर्ज्ञात्वा विचेष्टितं २९ साधून्संमानयेद्राजा विपरीतांस्तु घातयेत् उत्कोचजीविनो द्रव्यहीना
न्कृत्वा प्रवासयेत् ३० सदानमानसत्कारान् श्रोत्रियान्वासयेत्सदा अन्यायेन नृपो राष्ट्रात्स्वकोशं योऽभि
वर्धयेत् ३१ सो चिराद्विगतश्रीको नाशमेति सबांधवः प्रजापीडनसंतापात्समुद्भूतो हुताशनः ३२ राज्ञः
श्रियं कुलं प्राणान्नादग्ध्वा विनिवर्तते य एव नृपतेर्धर्मः स्वराष्ट्रपरिपालने ३३ तमेव कृत्स्नमाप्नोति परराष्ट्रं
वशं नयन् यस्मिन्देशे य आचारो व्यवहारः कुलस्थितिः ३४ तथैव परिपाल्योसौ यदा वशमुपागतः मंत्र
मूलं यतो राज्यमतो मंत्रं सुरक्षितं ३५ कुर्याद्यथा न च विदुः कर्मणामाफलोदयात् अरिर्मित्रमुदासीनोऽनंत
रस्तत्परः परः क्रमशो मंडलं चिंत्यं सामादिभिरुपक्रमैः ३७ उपायाः साम दानं च भेदो दंडस्तथैव च सम्यक् १४

प्रयुक्ताः सिध्येयुर्दंडस्त्वगतिका गतिः ३८ संधिं च विग्रहं यानमासनं संश्रयं तथा द्वैधीभावं गुणानेता
न्यथावत्परिपालयेत् ३९ यदा सस्यगुणोपेतं परराष्ट्रं तदा व्रजेत् परश्च हीन आत्मा च हृष्टवाहनपूरुषः ४०
दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता तत्र दैवमभिव्यक्तं पौरुषं पौर्वदैहिकं ४१ केचिद्दैवात्स्वभावाद्वा कालात्पुरुष
कारतः संयोगे केचिदिच्छंति फलं कुशलबुद्धयः ४२ यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत् एवं पुरुषकारेण वि
ना दैवं न सिध्यति ४३ हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः अतो यतेत तत्प्राप्तौ रक्षेत्सत्यं समाहितः
४४ स्वाम्यमात्या जनो दुर्गं कोशो दंडस्तथैव च मित्राण्येताः प्रकृतयो राज्यं सप्तांगमुच्यते ४५ तदवाप्य नृपो दं
डं दुर्वृत्तेषु निपातयेत् धर्मो हि दंडरूपेण ब्रह्मणा निर्मितः पुरा ४६ स नेतुं न्यायतोऽशक्यो लुब्धेनाकृतबुद्धि
ना सत्यसंधेन शुचिना सुसहायेन धीमता ४७ यथाशास्त्रं प्रयुक्तः सन्सदेवासुरमानवं जगदानंदयेत्सर्वम
न्यथा तत्प्रकोपयेत् ४८ अधर्मदंडनं स्वर्गकीर्तिलोकविनाशनं सम्यक्तु दंडनं राज्ञः स्वर्गकीर्तिजयावहं ४९ अ

अ. १

या. स्मृ. पितृभ्राता सुतो शिष्यो वा श्वशुरो मातुलो पि वा नादंड्यो नाम राज्ञो स्ति धर्मोद्धि चलितः स्वकात् ५० यो दंड्यान्दंड
१५ येद्राजा सम्यक्वध्यांश्च हि घातयेत् इष्टं स्यात्क्रतुभिस्तेन समाप्तवरदक्षिणैः ५१ इतिसंचिंत्य नृपतिः क्रतुतु
ल्यफलं पृथक् व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतो न्वहं ५२ कुलानि जातीः श्रेणीश्च गणान्जानपदानपि
स्वधर्माच्चलितान्राजा विनीय स्थापयेत्पथि ५३ जालसूर्यमरीचिस्थं त्रसरेणु रजः स्मृतं तेष्टौ लिक्षा स्तु ता
स्तिस्रो राजसर्षप उच्यते ५४ गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः कृष्णलः पंच ते माषस्ते सुवर्णस्तु षोड
श ५५ पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितं द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते शतमानं तु दशभि च
र्धरणैः पलमेव च निष्कः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः ५७ साशीतिः पणसाहस्रो दंड उत्तमसाहसः तदर्धे
मध्यमः प्रोक्तस्तदर्धमधमः स्मृतः ५८ धिग्दंडस्त्वथ वाग्दंडो धनदंडो वधस्तथा योज्या व्यस्ताः समस्ता वा ह्यपराध
वशादिमे ५९ ज्ञात्वापराधं देशं च कालं बलमथापि वा वयः कर्म च वित्तं च दंडं दंड्येषु पातयेत् ६० इतियाज्ञवल्की १५

हृष्यं

प्रजाभ्यश्चाभयं तथा १५ य आहवेषु युध्यंते भूम्यर्थमपराङ्मुखाः अकूटैरायुधैर्यांति ते स्वर्गं योगिनो यथा
१६ पदानि क्रतुतुल्यानि भग्नेष्वविनिवर्तिनां राजा सुकृतमादत्ते हतानां विपलायिनां १७ तवाहंवादिनं क्लीबं निर्हेतिं
परसंगतं न हन्याद्विनिवृत्तं च युद्धप्रेक्षणिकादिकं १८ कृतरक्षः समुत्थाय पश्येदायव्ययौ स्वयं व्यवहारांस्ततो दृष्ट्वा
स्नात्वा भुंजीत कामतः १९ हिरण्यं व्यापृतानीतं भांडागारेषु निक्षिपेत् पश्येच्चारांस्ततो दूतान्प्रेषयेन्मंत्रिसंगतः २०
मि ततः स्वैरविहारी स्यान्मंत्रिर्वा समन्वितः बलानां दर्शनं कृत्वा सेनान्या सह चिंतयेत् २१ संध्यामुपास्य शृणुयाच्चा
राणां गूढभाषितं गीतनृत्यैश्च भुंजीत पठेत्स्वाध्यायमेव च २२ संविशेत्तूर्यघोषेण प्रतिबुध्येत्तथैव च शास्त्राणि
चिंतयेद्बुध्या सर्वकर्तव्यतास्तथा २३ प्रेषयेच्च ततश्चारान्स्वेष्वन्येषु च सादरान् ऋत्विक्पुरोहिताचार्यैराशीर्भिरभि
नंदितः २४ दृष्ट्वा ज्योतिर्विदो वैद्यान्दद्याद्गां कांचनं महीं नैवेशिकानि च तथा श्रोत्रियेभ्यो गृहाणि च २५ ब्राह्म
णेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनो रिपु स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता २६ पुण्यात्षड्भागमादत्ते न्यायेन

या·स्मृ· यपारुष्ययोभिशापात्ययेस्त्रियं। विवादयेत्सद्यएवकालोन्यत्रेछयास्मृतः १२ देशाद्देशांतरंयातिसृक्किणी
१६ परिलेखिच ललाटंस्विद्यतेचास्यमुखंवैवर्ण्यमेतिच १३ परिशुष्यत्स्खलद्वाक्योविरुद्धंबहुभाषते वाक्च
क्षुःपूजयतिनोतथोष्ठौनिर्भुजत्यपि १४ स्वभावाद्विकृतिंगछेन्मनोवाक्कायकर्मभिः अभियोगेथसाक्ष्येवादुष्टःस
परिकीर्त्तितः १५ संदिग्धार्थंस्वतंत्रोयःसाधयेद्यश्चनिष्पतेत् नचाहूतोवदेत्किंचिद्धीनोदंड्यश्चसस्मृतः १६
साक्षिषूभयतःसत्सुसाक्षिणःपूर्ववादिनः पूर्वपक्षेधरीभूतेभवंत्युत्तरवादिनः १७ सपणश्चेद्विवादःस्यात्तत्र
हीनंतुदापयेत् दंडंचस्वपणंचैवधनिनेधनमेवच १८ छलंनिरस्यभूतेनव्यवहारान्नयेन्नृपः भूतमप्यनुपन्य
स्तंहीयतेव्यवहारतः १९ निह्नुतेलिखितंनैकमेकदेशविभावितः दाप्यःसर्वंनृपेणार्थंनग्राह्यस्त्वनिवेदितः २०
स्मृत्योर्विरोधेन्यायस्तुबलवान्व्यवहारतः अर्थशास्त्रात्तुबलवद्धर्मशास्त्रमितिस्थितिः २१ प्रमाणंलिखितंभु १६
क्तिःसाक्षिणश्चेतिकीर्त्तितं एषामन्यतमाभावेदिव्यान्यतममुच्यते २२ सर्वेष्वर्थविवादेषुबलवत्युत्तराक्रिया

आधौप्रतिग्रहेक्रीतेपूर्वातुबलवत्तरा २३ पश्यतोब्रुवतोभूमेर्हानिर्विंशतिवार्षिकी परेणभुज्यमानायाधन
स्यदशवार्षिकी २४ आधिसीमोपनिक्षेपजडबालधनैर्विना तथोपनिधिराजस्त्रीश्रोत्रियाणांधनैरपि
२५ आध्यादीनांविहर्त्तारंधनिनेदापयेद्धनं दंडंचतत्समंराज्ञेशक्त्यपेक्षमथापिवा २६ आगमोभ्यधिको
भोगाद्विनापूर्वक्रमागतात् आगमेपिबलंनैवभुक्तिस्तोकापियत्रनो २७ आगमस्तुकृतोयेनसोभियुक्तस्तमुद्ध
रेत् नतत्सुतस्तत्सुतोवाभुक्तिस्तत्रगरीयसी २८ योभियुक्तःपरेतःस्यात्तस्यरिक्थीतमुद्धरेत् नतत्रकारणंभुक्तिरा
गमेनविनाकृता २९ नृपेणाधिकृताःपूगाःश्रेणयोथकुलानिच पूर्वंपूर्वंगुरुज्ञेयंव्यवहारविधौनृणां ३० बलो
पाधिविनिर्वृत्तान्व्यवहारान्निवर्त्तयेत् स्त्रीनक्तमंतरागारबहिःशत्रुकृतांस्तथा ३१ मत्तोन्मत्तार्त्तव्यसनिबालभी
ताप्रयोजितः असंबद्धकृतश्चैवव्यवहारोनसिद्ध्यति ३२ प्रनष्टाधिगतंदेयंनृपेणधनिनेधनं विभावयेन्नचेचै
ल्लिंगैस्तत्समंदंडमर्हति ३३ राजालब्ध्वानिधिंदद्यात्द्विजेभ्योर्धंद्विजःपुनः विद्वानशेषमादद्यात्ससर्वस्य

३१.२

या.स्मृ. यतः प्रभुः ३४ इतरेणनिधौलब्धेराजाषष्ठांशमाहरेत् अनिवेदितविज्ञातोदाप्यस्तंदंडमेवच ३५
देयंचोरैर्हृतंद्रव्यंराज्ञाजानपदायतु अददद्धिसमाप्नोतिकिल्बिषंतस्यतस्यतत् ३६ इतिव्यवहारमात
१८ काप्रकरणं अशीतिभागोवृद्धिःस्यान्मासिमासिसबंधके वर्णक्रमाच्छतंद्वित्रिचतुःपंचकमन्यथा १ कां
तारगास्तुदशकंसामुद्राविंशकंशतं दद्युर्वास्वीकृतांवृद्धिंसर्वेसर्वासुजातिषु २ संततिस्तुपशुस्त्रीणांर
सस्याष्टगुणापरा वस्त्रधान्यहिरण्यानांचतुस्त्रिद्विगुणातथा ३ प्रपन्नंसाधयन्नर्थंनवाच्योनृपतेर्भवेत् सा
ध्यमानोनृपंगच्छेद्दंड्योदाप्यश्चतद्धनं ४ गृहीतानुक्रमाद्दाप्योधनिनामधमर्णिकः दत्वातुब्राह्मणायैवनृपते
स्तदनंतरं ५ राज्ञाधमर्णिकोदाप्यःसाधिताद्दशकंशतं पंचकंतुशतंदाप्यःप्राप्तार्थो[illegible]त्तमर्णिकः ६ यु
हीनजातिंपरिक्षीणमृणार्थंकर्मकारयेत् ब्राह्मणस्तुपरिक्षीणःशनैर्दाप्योयथोदयं ७ दीयमानंनगृह्णा १८
तिप्रयुक्तंयःस्वकंधनं मध्यस्थस्थापितंचेत्स्याद्वर्धतेनततःपरं ८ अविभक्तैःकुटुंबार्थेयदृणंतुकृतंभवेत्

येधर्मशास्त्रेप्रथमोध्यायः व्यवहारान्नृपःपश्येद्विद्वद्भिर्ब्राह्मणैःसह धर्मशास्त्रानुसारेणक्रोधलोभवि
वर्जितः १ श्रुताध्ययनसंपन्नाधर्मज्ञाःसत्यवादिनः राज्ञासभासदःकार्यारिपौमित्रेचयेसमाः २ अपश्यता
कार्यवशाद्व्यवहारान्नृपेणतु सभ्यैःसहनियोक्तव्योब्राह्मणःसर्वधर्मवित् ३ रागाल्लोभाद्भयाद्वापिस्मृत्यपेता
दिकारिणः सभ्याःपृथक्पृथक्दंड्याविवादाद्द्विगुणंदमं ४ स्मृत्याचारव्यपेतेनमार्गेणाधर्षितःपरैः आवेदयतिय
द्राज्ञेव्यवहारपदंहितत् ५ प्रत्यर्थिनोग्रतोलेख्यंयथावेदितमर्थिना समामासतदर्धाहर्नामजात्यादिचिह्नितं ६
श्रुतार्थस्योत्तरंलेख्यंपूर्वावेदकसन्निधौ ततोर्थीलेखयेत्सद्यःप्रतिज्ञातार्थसाधनं ७ तत्सिद्धौसिद्धिमाप्नोतिविपरी
तमतोन्यथा चतुष्पाद्व्यवहारोयंविवादेषूपदर्शितः ८ अभियोगमनिस्तीर्यनैनंप्रत्यभियोजयेत् अभियुक्तं
चनान्येननोक्तंविप्रकृतिंनयेत् ९ कुर्यात्प्रत्यभियोगंचकलहेसाहसेषुच उभयोःप्रतिभूर्ग्राह्यःसमर्थःकार्य
निर्णये १० निह्नवेभावितोदद्याद्धनंराज्ञेचतत्समं मिथ्याभियोगीद्विगुणमभियोगाद्धनंवहेत् ११ सासेहस्ते

या॰स्मृ॰ १८ न मोक्ष्यते काले कालेकृतो नश्येत्फलभोग्यो न नश्यति २१ गोप्याधिभोगे नो वृद्धिः सोपकारे थ हापिते नष्टो
देयो विनष्टश्चैव राजकृताद्दृते २२ आधिः स्वीकरणात्सिद्धि रक्ष्यमाणोप्यसारतां यातश्चेदन्य आधेयो धनभाग्वाध
नी भवेत् २३ चरित्रबंधककृतं सवृद्ध्या दापयेद्धनं सत्यंकारकृतं द्रव्यं द्विगुणं प्रतिपादयेत् २४ उपस्थितस्य मोक्त
व्य आधिस्तेनोन्यथा भवेत् प्रयोजके सति धनं कुलेन्यस्याधिमाप्नुयात् २५ तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धि
कः विना धारणिकाद्वापि विक्रीणीत ससाक्षिकं २६ यदा तु द्विगुणीभूतमृणमाधौ तथा खलु मोच्य आधिस्तदुत्प
न्ने प्रविष्टे द्विगुणे धने २७ इति ऋणादानप्रकरणं वासनस्थमनाख्याय हस्ते न्यस्य यदर्प्यते द्रव्यं तदौपनिधिकं
प्रतिदेयं तथैव तत् १ न दाप्योपहृतं तं तु राजदैविकतस्करैः भ्रेषश्चेन्मार्गिते दत्ते दाप्यो दंडं च तत्समं २ आजीव
न्स्वेच्छया दंड्यो दाप्यस्तं चापि सोदयं याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः ३ इति निक्षेपप्रकरणं॥ ॥तप १८
स्विनो दानशीलाः कुलीनाः सत्यवादिनः धर्मप्रधाना ऋजवः पुत्रवंतो धनान्विताः १ त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मा

र्तक्रियापराः यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः रंगावतारि
पाखंडिकूटकृद्विकलेंद्रियाः ३ पतिताप्तार्थसंबंधिसहायरिपुतस्कराः साहसी दृष्टदोषश्च निर्धूताद्यास्त्व साक्षिणः
४ उभयानुमतः साक्षी भवत्येकोपि धर्मवित् सर्वः साक्षी संग्रहणे चौर्ये पारुष्यसाहसे ५+ अब्रुवन्हि नरः साक्ष्यमृ
हनि णं सदशबंधकं राज्ञा सर्वं प्रदाप्यः स्यात् षट्चत्वारिंशके १०+ न ददाति हि यः साक्ष्यं जानन्नपि नराधमः स कूटसाक्षि
णां पापैस्तुल्यो दंडेन चैव हि ११ साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान् ये पातककृतां लोका महापातकिनां तथा
(७) अग्निदानां च ये लोका ये च स्त्रीबालघातिनां सतान्सर्वानवाप्नोति यः साक्ष्यमनृतं वदेत् ८ सुकृतं यत्त्वया किंचि न
ज्जन्मांतरशतैः कृतं तत्सर्वं तस्य जानीहि यं पराजयसे मृषा ९४ द्वैधे बहूनां वचनं समेषु गुणिनां तथा गुणिद्वै
धे तु वचनं ग्राह्यं ये गुणवत्तमाः १२ यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् अन्यथा वादिनो यस्य ध्रुवस्त
स्य पराजयः १३ उक्तेपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तमाः द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः १४ पृ
थक् पृथक् दंडनीयाः कूटकृत्साक्षिणस्तथा विवादाद्द्विगुणं दंडं विवास्यो ब्राह्मणः स्मृतः १५ यः साक्षी श्रावितोन्येभ्यो

या॰स्मृ॰ निह्नुते तत्तमोवृतः सदाप्योष्टगुणं दंडं ब्राह्मणं तु विवासयेत् १८ वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदे
१९ त् तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः १९ इति साक्षिप्रकरणं यः कश्चिदर्थो निष्णातः स्वरुच्या तु
परस्परं लेख्यं तु साक्षिमत्कार्यं तस्मिन्धनिकपूर्वकं समामासतदर्धाहर्नामजातिस्वगोत्रकैः सब्रह्मचारिकात्मीय
पितृनामादिचिह्नितं २ समाप्तेर्थे ऋणी नाम स्वहस्तेन निवेशयेत् मतं मेमुकपुत्रस्य यदत्रोपरि लेखितं ३ साक्षिण द
श्च स्वहस्तेन पितृनामकपूर्वकं अत्राहममुकः साक्षी लिखेयुरिति ते समाः ४ उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना
लिखितं ह्यमुकेनेति लेखकोंततो लिखेत् ५ विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत् तत्प्रमाणं स्मृतं सर्वं
बलोपाधिकृताद्दते ६ ऋणी लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते ७ देशांतर
स्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा भिन्ने दग्धे वा छिन्ने लेख्यमन्यत्तु कारयेत् ८ संदिग्धलेख्यशुद्धिः स्यात्स्वहस्तलिखिता
दिभिः युक्तिप्राप्तिक्रियाचिह्नसंबंधागमहेतुभिः ९ लेख्यस्य पृष्ठेभिलिखेद्दत्वा दत्वार्णिको धनं धनी चोपगतं दद्यात्स्व १९
हस्तपरिचिह्नितं १० दत्वार्णं पाटयेल्लेख्यं शुद्ध्यै वान्यत्तु कारयेत् साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकं ११ इति लेख्यप्र

लेख्यं

स्कराकामद्यूतकृतं दंडशुल्कावशिष्टकं ॥ वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकं ॥११॥ २

क दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुंबिनि ९ न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता दद्याद्दते कुटुंबार्थान्न पतिः
स्त्रीकृतं तथा १० गोपशौंडिकशैलूषरजकव्याधियोषितां ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रया ११ प्रतिपन्नं
स्त्रिया देयं पत्या वा सह यत्कृतं स्वयं कृतं वा यदृणं नान्यत्स्त्री दातुमर्हति १२ पितरि प्रोषिते प्रेते व्यसनाभिप्लुते पि वा
पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितं १३ रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च पुत्रोनन्याश्रितद्रव्यः पुत्र
हीनस्य रिक्थिनः १४ (स्कराकामद्युतकृतं दंडशुल्कावसिष्टकं वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकं) १५ भ्रातॄणामथ
दंपत्योः पितुः पुत्रस्य चैव हि प्रातिभाव्यमृणं साक्ष्यमविभक्तेन तु स्मृतं १६ दर्शने प्रत्यये दाने प्रातिभाव्यं विधीय
ते आद्यौ तु वितथे दाप्यावितरस्य सुता अपि १७ दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोपि वा न तत्पुत्रा ऋणं दद्युर्दद्यु
र्दानाय यः स्थितः १८ बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनं एकछायाश्रितेष्वेषु धनिकस्य यथारुचि १९ प्रति
भूर्दापितो यत्र प्रकाशं धनिनो धनं द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत् २० आधिः प्रणश्येद्द्विगुणे धने यदि
संततिस्त्रीपशव्यस्य धान्यं त्रिगुणमेव च ॥ वस्त्रं चतुर्गुणं प्रोक्तं रसस्त्वष्टगुणस्तथा ॥ २१ ॥ इति प्रातिभूविधिः २

या·स्मृ· उत्था निशनैर्व्रजेत् १२ षोडशांगुलकं ज्ञेयं मंडलं तावदंतरं मुक्त्वाग्निं मर्दितव्रीहिरदग्धः शुद्धिमाप्नुयात् १३ अं
२० तरापतिते पिंडे संदेहे वा पुनर्हरेत् सत्येन माभिरक्षस्त्वं वरुणेत्यभिशाप्य कं १४ नाभिदघ्नोदकस्थस्य गृहीत्वोरु ज
लं विशेत् समकालमिषुं मुक्तमानीयान्यो जवी नरः १५ गते तस्मिन्निमग्नांगं पश्येच्चेच्छुद्धिमाप्नुयात् त्वं विष ब्रह्म
णः पुत्र सत्यधर्मे व्यवस्थितः १६ त्रायस्वास्मादभीशापात्सत्येन भव मेऽमृतं एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैल
जं १७ यस्य वेगैर्विना जीर्येच्छुद्धिं तस्य विनिर्दिशेत् देवानुग्रान्समभ्यर्च्य तत्स्नानोदकमाहरेत् १८ संश्राव्य पाययेत्
तस्माज्जलात्तु प्रसृतित्रयं अर्वाक्चतुर्दशादह्नो यस्य नो राजदैविकं १९ व्यसनं जायते घोरं स शुद्धः स्यान्न संशयः
१९ इति दिव्यप्रकरणं विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान् ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः
१ यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशकाः न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा २ शक्तस्यानीहमानस्य
किंचिद्दत्त्वा पृथक्क्रिया न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः ३ विभजेरन्सुताः पित्रोरूर्ध्वं रिक्थमृणं २०

समं मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेन्वयः ४ पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितं मैत्रमौद्वाहिकं चै
व दायादानां न तद्भवेत् ५ क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ६ सामा
न्यार्थसमुत्थाने विभागस्तु समः स्मृतः अनेकपितृकाणां तु पितृतो भागकल्पना ७ भूर्या पितामहोपात्ता निबंधो
द्रव्यमेव वा तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि ८ विभक्तेषु सुतो जातः सवर्णायां विभागभाक् दृश्या
द्वा तद्विभागः स्यादायव्ययविशोधितात् ९ पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत् पितुरूर्ध्वं विभजतां माताप्यंशं
समं हरेत् १० असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकं ११ चतुस्त्रि
द्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः १२ अन्योन्यापहृतं द्रव्यं विभ
क्तैर्यत्तु दृश्यते तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः १३ अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः उभयोरप्यसौ
रिक्थी पिंडदाता च धर्मतः १४ औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा १५
कूर्धी १ यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ॥ तामनेन विधानेन निजो विंदेत देवरः ॥१५॥

या॰स्मृ॰ गृहे प्रछन्न उत्पन्नो गूढजस्तु सुतः स्मृतः कानीनः कन्यकाजातो मातामहसुतो मतः १६ अक्षतायां क्षतायां वा
२१ जातः पौनर्भवः सुतः दद्यान्माता पिता यं वा स पुत्रो दत्तको भवेत् १७ क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः
दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः उत्सृष्टो १८ उत्सृष्टो गृह्यते यस्तु सोपविद्धो भवेत्सुतः पिंडदोंशहरश्चैषां पू
स र्वाभावे परः परः १९ सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः जातोपि दास्यां शूद्रेण कामतोंशहरो भवेत् २० मृते
पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकं अभ्रातृको हरेत्सर्वं दुहितॄणां सुताद्ऋते २१ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा
तत्सुता गोत्रजा बंधुशिष्यसब्रह्मचारिणः २२ एषामभावे पूर्वस्य धनभागुत्तरोत्तरः स्वर्यातस्य ह्यपुत्रस्य सर्वव
र्णेष्वयं विधिः २३ वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः २४ सं
सृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः दद्याच्चापहरेच्चांशं जातस्य च मृतस्य च २५ अन्योदर्यस्तु संसृष्टी नान्योदर्यो २१
धनं हरेत् असंसृष्ट्यपि वादद्यात्संसृष्टो नान्यमातृजः २६ क्लीबोथ पतितस्तज्जः पंगुरुन्मत्तको जडः अंधोचिकि

यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय ॥ ८ ॥

करणं ॥ ॥ तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये महाभियोगेष्वेतानि शीर्षकस्थेभियोक्तरि १ रुच्या क
वान्यतरः कुर्यादपरो वर्तयेच्छिरः विनापि शीर्षकात्कुर्यान्नृपद्रोहेथ पातके २ महातीर्थे तुलादीनि कोशमल्पेन दा
पयेत् शतार्धं दापयेच्छुद्धमशुद्धं दंडयेन्नृपः ३ सचेलं स्नानमाहूय सूर्योदय उपोषिते कारयेत्सर्वदिव्यानि नृपब्राह्म
णसंनिधौ ४ तुला स्त्रीबालवृद्धांधपंगुब्राह्मणरोगिणां अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा ५ नासहस्राद्
हरेत्फालं न तुलां न विषं तथा नृपार्थेष्वभिशापे च वहेयुः शुचयः सदा ६ तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः
प्रतिमानसमीभूतो रेखां कृत्वावतारितः ७ त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता तत्सत्यं वद कल्याणि संशया
न्मां विमोचय ८ शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमंत्रयेत् करौ विमृदितव्रीहेर्लक्षयित्वा ततो न्यसेत् ९ सप्ता
श्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत् त्वमग्ने सर्वभूतानामंतश्चरसि पावक १० साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं क
वे मम तस्येत्युक्तवतो लोहं पंचाशत्पलिकं समं ११ अग्निवर्णं न्यसेत्पिंडं हस्तयोरुभयोरपि सत्तमादाय सप्तैव मं

मौलवृद्धादयस्त्वन्ये दंडनीयाः पृथक्पृथक्॥

या·स्म· सामंता वा समग्रामाश्चत्वारोष्टौ दशापि वा रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः ३ अनृते तु पृथक्
२२ दंड्या राज्ञा मध्यमसाहसं अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता ४ आरामायतनग्रामनिपानोद्यानवेश्मसु
एष एव विधिर्ज्ञेयो वर्षांबुप्रवहादिषु ५ मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा क्षेत्रस्य हरणे दंडा अधमोत्तममध्य
माः ६ न निषेध्योल्पबाधस्तु सेतुः कल्याणकारकः परभूमिं हरन्कूपः स्वल्पक्षेत्रो बहूदकः ७ स्वामिने यो निवेद्यै
व क्षेत्रे सेतुं प्रवर्तयेत् उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः ८ फालाहतमपि क्षेत्रं यो न कुर्यान्न कारयेत् स प्रदाप्यो
फलं कृष्टसस्यं क्षेत्रमन्येन कारयेत् ९ इति सीमाविवादप्रकरणं माषानष्टौ तु महिषी सस्यघातककारिणी दंडनीया स्य
तदर्धं तु गौस्तदर्धमजाविकं १ भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः सममेषां विवीतेपि खरोष्ट्रं महिषीसमं २
यावत्सस्यं विनश्येत्तु तावत्स्यात्क्षेत्रिणः फलं गोपस्ताड्यश्च गोमी तु पूर्वोक्तं दंडमर्हति ३ महोक्षोत्सृष्टपशवः सूति
ह कागंतुकादयः पालो येषां न ते मोच्या राजदैवपरिप्लुताः ४ यथार्पितान्पशून्गोपः सायं प्रत्यर्पयेत्तथा प्रमादमृतनष्टान् २२
पथि ग्रामविवीतांते क्षेत्रे दोषो न विद्यते ॥ अकामतः कामचारे चौरवद्दंडमर्हति॥

स्य३ वा

श्च प्रदाप्यः कृतवेतनः ५ पालदोषविनाशे तु पाले दंडो विधीयते अर्धत्रयोदशपणः स्वामिने मूल्यमेव च
६ ग्रामेच्छया गोप्रचारो भूमिराजवशेन वा द्विजस्तृणैधः पुष्पाणि सर्वतः स्ववदाहरेत् ७ धनुःशतं परीणाहो ग्रा
ख मक्षेत्रांतरं भवेत् द्वे शते खर्वटस्य स्यान्नगरस्य चतुःशतं ८ इति स्वामिपालविवादप्रकरणं स्वं लभेतान्यविक्रीतं क्रेतु
र्दोषेप्रकाशिते हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः १ नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरं देशकालातिपत्तौ वा गृ
हीत्वा स्वयमर्पयेत् २ विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमं क्रेता मूल्यमवाप्नोति यस्तस्य विक्रयी ३ आगमेनो
पभोगेन नष्टं भाव्यमतोन्यथा पंचबंधो दमस्तस्य राज्ञे तेनाविभाविते ४ हृतं प्रनष्टं यो द्रव्यं परहस्तादवाप्नुयात् अ
निवेद्य नृपे दंड्यः स तु षण्णवतिः पणान् ५ शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतं अर्वाक्संवत्सरात्स्वामी हरे
त परतो नृपः ६ पणानेकशफे दद्याच्चतुरः पंच मानुषे महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके ७ स्वं कुटुंबाविरोधे
न देयं दारसुतादृते नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतं ८ प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः देयं प्रति

या॰स्मृ॰ कृतंचैवरत्वानापाहरेत्पुनः ९ देशेकपंचसप्ताहमासत्र्यहार्धमासिकं बीजायोवाह्यरत्नस्त्रीदोह्यपुं
२३ सांपरीक्षणे १० अग्नौसुवर्णमक्षीणंद्विफलंरजतेशतं अष्टौत्रपुणिसीसेचताम्रेपंचदशायसि ११ शतेदश
फलावृद्धिरोर्णेकार्पासेसौत्रिके मध्येपंचफलावृद्धिःसूक्ष्मेतुत्रिपलामता १२ कार्मिकेरामबद्धेचत्रिंशद्भागः
क्षयोमतः नक्षयोनचवृद्धिःस्यात्कौशेयेवाल्कलेषुच १३ देशंकालंचभोगंचज्ञात्वानष्टेबलाबलं द्रव्याणांकु
शलाब्रूयुर्यत्तद्दाप्यमसंशयं १४ बलाद्दासीकृतोयश्चविक्रीतश्चापिमुच्यते स्वामिप्राणप्रदोभक्तत्यागात्तन्नि
ष्क्रयादपि १५ प्रव्रज्यावसितेराज्ञोदासआमरणांतिकः वर्णानामानुलोम्येननिंद्यःसप्रतिलोमतः १६ कृतशि
ल्पोपिनिवसेत्कृतकालंगुरोर्गृहं अंतेवासिगुरुप्राप्तभोजनस्तत्फलप्रदः १७ राजाकृत्वापुरेस्थानंब्राह्मणान्न्य
स्यतत्रतत् त्रैविद्यंवृत्तिमद्ब्रूयात्स्वधर्मःपाल्यतामिति १८ निजधर्माविरोधेनयस्तुसामयिकोभवेत् सोपिय २३
त्नेनसंरक्ष्योधर्मोराजकृतश्चयः १९ गणद्रव्यंहरेद्यस्तुसंविदंलंघयेच्चयः सर्वस्वहरणंकृत्वातंराष्ट्राद्विप्रवासयेत् २०

स्त्यरोगाद्याभर्त्तव्यास्तुनिरंशकाः २७ औरसाःक्षेत्रजास्तेषांनिर्दोषाभागहारिणः सुताश्चैषांप्रभर्त्त
व्यायावद्वैभर्त्तसात्कृताः २८ अपुत्रायोषितश्चैषांभर्त्तव्याःसाधुवृत्तयः निर्वास्याव्यभिचारिण्यःप्रतिकूलास्तथै
वच २९ पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतं आधिवेदनिकाद्यंचस्त्रीधनंपरिकीर्त्तितं ३० बंधुदत्तंतथाशुल्क
मन्वाधेयिकमेवच अतीतायामप्रजसिबांधवास्तदवाप्नुयुः ३१ अप्रजस्त्रीधनंभर्त्तुर्ब्राह्म्यादिषुचतुर्ष्वपि दुहितॄ
णांप्रसूताचेच्छेषेषुपितृगामितत् ३२ दत्वाकन्यांहरन्दंड्योव्ययंदद्याच्चसोदयं मृतायांसर्वमादद्यात्परिशोध्योभ
५ यव्ययं ३३ दुर्भिक्षेधर्मकार्येचव्याधौसंप्रतिरोधके गृहीतंस्त्रीधनंभर्त्तानस्त्रियैदातुमर्हति ३४ अधिविन्नस्त्रि
यैदद्यादाधिवेदनिकंसमं नदत्तंस्त्रीधनंयस्यैदत्तेत्वर्धंप्रकीर्त्तितं विभागनिह्नवेज्ञातिबंधुसाक्ष्यभिलेखितैः विभा
गभावनाज्ञेयागृहक्षेत्रैश्चयौतकैः ३६ इतिविभागप्रकरणं सीम्नोविवादेक्षेत्रस्यसामंताःस्थविरादयः गोपाःसी
सीमाकृषीणाश्चसर्वेवचनगोचराः १ नयेयुरेतेसीमानंस्थूलांगारतुषद्रुमैः सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षितां २

या॰ स्मृ॰ इति वेतनादानं ग्लहे शतिकवृद्धेस्तु सभिकः पंचकं शतं गृह्णीयाद्धूर्तकितवादितराद्दशकं शतं १ स सम्य
२८ लि क्पालितो दद्यात् राज्ञो भागं यथाकृतं जितमुद्ग्राहयेज्जेत्रे दद्यात्सत्यं वचः क्षमी २ प्राप्ते नृपतिना भागे प्रसिद्धे
धूर्तमंडले जितं ससभिके स्थाने दापयेदन्यथा न तु ३ द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि राज्ञा सचिह्नं
निर्वास्याः कूटाक्षोपधिदेविनः ४ द्यूतमेकमुखं कार्यं तस्करज्ञानकारणात् एष एव विधिर्ज्ञेयः प्राणिद्यूते समा
ह्वये ५ इति द्यूतसमाह्वयं ७ सत्यासत्यान्यथास्तोत्रैर्न्यूनांगेंद्रियरोगिणां क्षेपं करोति चेद्दंड्यः पणानर्धत्र
योदश १ अभिगंतास्मि भगिनीं मातरं वा तवेति ह शपंतं दापयेद्राजा पंचविंशतिकं दमं २ अर्धोऽधमेषु द्विगुणः
परस्त्रीषूत्तमेषु च दंडप्रणयनं कार्यं वर्णजात्युत्तराधरैः ३ प्रातिलोम्यापवादेषु द्विगुणास्त्रिगुणा दमाः वर्णानामानु
लोम्येन तस्मादेवार्धहानितः ४ बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः शत्यस्तदर्धिकः पादनासाकर्णक २८
रादिषु ५ अशक्तस्तु वदन्नेवं दंडनीयः पणान्दश तथा शक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु ६ पतनीये कृते

क्षेपे दंडो मध्यमसाहसः उपपातकयुक्ते तु दाप्यः प्रथमसाहसं ७ त्रैविद्यनृपदेवानां क्षेप उत्तमसाहसः मध्य
मो जातिपूगानां प्रथमो ग्रामदेशयोः ८ असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतो
भयात् ९ भस्मपंकरजःस्पर्शे दंडो दशपणः स्मृतः अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणस्ततः १० समेष्वेवं परस्त्री
षु द्विगुणस्तूत्तमेषु च हीनेष्वर्धदमो मोहमदादिभिरदंडनं ११ विप्रपीडाकरं छेद्यमंगमब्राह्मणस्य तु उद्गूर्णे प्रथ
मो दंडः संस्पर्शे तु तदर्धिकः १२ उद्गूर्णे हस्तपादे तु शतविंशतिको दमौ परस्परं तु सर्वेषां शस्त्रे मध्यमसाहसः १३ पा
दकेशांशुककरोल्लुंचनेषु पणान्दश पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः १४ शोणितेन विना दुःखं कुर्वन्काष्ठा
दिभिर्नरः द्वात्रिंशतं पणान्दाप्यो द्विगुणं दर्शनेऽसृजः १५ करपाददतो भंगे छेदने कर्णनासयोः मध्यो दंडो व्रणोदे द्भे
मृतकल्पहते तथा १६ चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने कंधराबाहुसक्थ्नां च भंगे मध्यमसाहसः १७ ए
कं घ्नतां बहूनां च यथोक्ताद्द्विगुणो दमः कलहापहृतं देयं दंडश्च द्विगुणः स्मृतः १८ दुःखमुत्पादयेद्यस्तु स समु

या॰स्मृ॰ क्षामजं व्ययं दाप्यो दंडं च यो यस्मिन्कलहे समुदाहृतः १९ अभिघाते तथा छेदे भेदे कुड्यावपातने पणान्दाप्यः
२५ पंचदश विंशतिं तद्व्ययं तथा २० दुःखोत्पादि गृहे द्रव्यं क्षिपन्प्राणहरं तथा षोडशाद्यः पणान्दाप्यो द्वितीयो मध्य घः
मं दमं २१ दुःखे च शोणितोत्पादे शाखांगच्छेदने तथा दंडः क्षुद्रपशूनां तु द्विपणप्रभृतिः क्रमात् २२ लिंगस्य छे
दने मृत्यो मध्यमो मूल्यमेव च महापशूनामेतेषु स्थानेषु द्विगुणो दमाः २३ प्ररोहिशिखिनां शाखास्कंधसर्ववि
दारणे उपजीव्यद्रुमाणां तु विंशतिर्द्विगुणो दमः २४ चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये जातद्रुमाणां द्वि
जी गुणो दमो वृक्षे च विश्रुते २५ गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधां पूर्वस्मृतादर्धदंडः स्थानेषूक्तेषु कर्तने २६
सामान्यद्रव्यप्रसभहरणात्साहसं स्मृतं तन्मूल्याद्द्विगुणो दंडो निह्नवे तु चतुर्गुणः २७ यः साहसं कारयति स दा
प्यो द्विगुणं दमं यश्चैवमुक्त्वाहं दाता कारयेत्स चतुर्गुणं २८ अर्घ्याक्रोशातिक्रमकृद्भ्रातृभार्याप्रहारदः संदिष्ट २५
स्याप्रदाता च समुद्रगृहभेदकृत् २९ सामंतकुलिकादीनामपकारस्य कारकः पंचाशत्पणिको दंड एषामिति विनि

कर्त्तव्यं वचनं सर्वैः समूहहितवादिनां यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमं २१ समूहकार्य आया
तान्कृतकृत्यान्विसर्जयेत् स दानमानसत्कारैः पूजयित्वा महीपतिः २२ समूहकार्यप्रहितो यल्लभेत तदर्पयेत्
सोपियलेन संरक्ष्यो धर्मो राजकृतश्च यः एकादशगुणं दाप्यो यद्यसौ नार्पयेत्स्वयं २३ धर्मज्ञाः शुचयो लुब्धा भ
वेयुः कार्यचिंतकाः कर्त्तव्यं वचनं तेषां समूहहितवादिनां २४ श्रेणिनैगमपाषंडिगणानामप्ययं विधिः भेदं चै
षां नृपो रक्षेत्पूर्ववृत्तिं च पालयन् २५ गृहीतवेतनः कर्म त्यजन्द्विगुणमावहेत् अगृहीते समं दाप्यो भृत्यै रक्ष्य
उपस्करः २६ दाप्यस्तु दशमं भागं वाणिज्यपशुशस्यतः अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता २७ देश
कालं च योतीयाल्लाभं कुर्याच्च योन्यथा तत्र स्यात्स्वामिनः छंदोधिकं देयं कृतेधिके २८ यो यावत्कुरुते कर्म तावत्तस्य तु
वेतनं उभयोरप्यसाध्यं चेत्साध्ये कुर्याद्यथाश्रुतं २९ अराजदैवकं नष्टं भांडं दाप्यस्तु वाहकः प्रस्थानविघ्नकृच्चैव
प्रदाप्यो द्विगुणां भृतिं प्रक्रांते सप्तमं भागं चतुर्थं पथि संत्यजेत् भृतिमर्धपथे सर्वां प्रदाप्यस्त्याजकोपि च ३१

जानतोदमउत्तमउत्तमः

या·स्मृ· स्तथोडश मद्यमेमणिसूत्राय:कार्पासवल्कलवाससां ४२ अजातौजातिकरणेविक्रेयाष्टगुणोदमः समुद्ग
२६ परिवर्त्तेचसारभांडंचकृत्रिमं ४३ आधीनंविक्रयंवापिनयतोदंडकल्पना भिन्नेपणेतुपंचाशत्पणेतुशतमुच्य
ते ४४ द्विपणे द्विशतोदंडोमूल्यवृद्धौतुवृद्धिमान् संभूयकुर्वतामर्घंसबाधंकारुशिल्पिनां ४५ अर्घस्य
ह्रासंवृद्धिंवासाहस्रोदंडउच्यते संभूयवणिजांपण्यमनर्घेणोपरुंधतां ४६ विक्रीणतांवाविहितोदंडउत्तम
साहसः राजनिःस्थाप्यतेयोर्घःप्रत्यहंतेनविक्रयः क्रयोवानिस्रवस्तस्माद्वणिजांलाभकृत्स्मृतः स्वदेशपण्येतु
शतंवणिग्गृह्णीतपंचकं ४८ दशकंपारदेश्येतुयःसद्यःक्रयविक्रयी पण्यस्योपरिसंस्थाप्यव्ययंपण्यसमु
द्भवं ४९ अर्घोनुग्रहकृत्कार्यःक्रेतुर्विक्रेतुरेवच गृहीतमूल्यंयःपण्यंक्रेतुर्नैवप्रयच्छति ५० सोदयंतस्यदा
प्योसोदिग्लाभंवादिगागते विक्रीतमपिविक्रेयंपूर्वक्रेतर्यगृह्णति ५१ हानिश्चेत्क्रेतृदोषेणक्रेतुरेवहिसाभ
वेत् राजदैवोपघातेनपण्येदोषमुपागते ५२ हानिश्चेत्क्रेतुरेवासौयाचितस्याप्रयच्छतः अन्यहस्तेचविक्रीतं

दुष्टंवादुष्टवाद्यपि ५३ विक्रीणीतेदमस्तत्रमूल्यात्तुद्विगुणोभवेत् क्षयंवृद्धिंचवणिजापण्यानामविजानता ५४
क्रीत्वानानुशयःकार्यःकुर्वन्षड्भागदंडभाक् समवायेनवणिजांलाभार्थंकर्मकुर्वतां ५५ लाभालाभौयथाद्रव्यं
दि यथावासंविदाकृतौ प्रतिषिद्धमनादिष्टंप्रमादाद्यच्चनाशितं ५६ सतद्दद्याद्विप्लवाच्चरक्षिताद्दशमांशभाक् अर्घ
प्रक्षेपणाद्विंशंभागंशुल्कंनपोहरेत् ५७ व्यासिद्धंराजयोग्यंचविक्रीतंराजगामितत् मिथ्यावदन्परीणामंशुल्कस्था
नादपासरन् ५८ दाप्यस्त्वष्टगुणंयश्चसव्याजक्रयविक्रयी तरिकस्थलजंशुल्कंगृह्णन्दाप्यःपणान्दश ५९ ब्राह्मण
प्रातिवेश्यानामेतदेवानिमंत्रणे देशांतरगतेप्रेतेद्रव्यंदायादबांधवाः ६० ज्ञातयोवाहरेयुस्तदागतास्तैर्विनानृपः जिह्मं ता
स्त्यजेयुर्निर्लाभमशक्तोन्येनकारयेत् ६१ अनेनविधिराख्यातऋत्विक्कर्षककर्मिणां ग्राहकैर्गृह्यतेचोरोलोप्त्रेणा
थपदेनवा ६३ पूर्वकर्मापराधीचतथाचाशुद्धवासकः अन्येपिशंकयाग्राह्याजातिनामादिनिह्नवैः द्यूतस्त्रीपान
सक्ताश्चशुष्कभिन्नमुखस्वराः परद्रव्यगृहाणांचपृच्छकागूढचारिणः ६५ नायोव्ययवंतश्चविनष्टद्रव्यविक्रयाः

या.स्मृ. गृहीतः शंकया चौर्ये नात्मानं चेद्विशोधयेत् ६६ दापयित्वा हृतं द्रव्यं चौरदंडेन दंडयेत् चोरं प्रदाप्याप
२७ हृतं घातयेद्विविधैर्वधैः ६७ सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् घातितेऽपहृते दोषो ग्रामभर्तुरनि
र्गते ६८ विवीतभर्तुस्तु पथि चोरोद्धर्तुरवीतके स्वसीम्नि दद्याद्ग्रामस्तु पदं वा यत्र गच्छति ६९ पंचग्रामी बहिः
क्रोशाद्दशग्राम्यथवा पुनः बंदिग्राहांस्तथा वाजिकुंजराणां च हारिणः ७० प्रसह्य घातिनश्चैव शूलानारोप
येन्नरान् उत्क्षेपकग्रंथिभेदौ करसंदंशहीनकौ ७१ कार्यौ द्वितीयापराधे करपादैकहीनकौ क्षुद्रमध्यमहा
द्रव्यहरणे सारतो दमः देशकालवयःशक्तिं संचिंत्यं दंडकर्मणि भक्तावकाशाग्न्युदकमंत्रोपकरणव्ययात् ७३
दत्वा चोरस्य वा हंतुर्जानतो दंड उत्तमः शस्त्रावपाते गर्भस्य पातने चोत्तमो दमः ७४ उत्तमो वाधमो वापि पुरुष
स्त्रीप्रमापणे विप्रदुष्टां स्त्रियं चैव पुरुषघ्नीमगर्भिणीं ७५ सेतुभेदकरीं चाप्सु शिलां बध्वा प्रवेशयेत् वि २७
षाग्निदां पतिगुरुनिजापत्यप्रमापणीं ७६ विकर्णकरनासोष्ठीं कृत्वा गोभिः प्रमापयेत् अविज्ञातहतस्याशु क

अंतरे च तयोर्यः स्यात्तस्याप्यष्टगुणो दमः

धा

श्चयः ३० स्वच्छंदविधवागामी विक्रुष्टेनाभिधावकः अकारणे च विक्रोष्टा चंडालश्चोत्तमान्स्पृशन् ३१ शूद्र
प्रव्रजितानां च दैवे पित्र्ये च भोजकः अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् ३२ वृषक्षुद्रपशूनां च पुंस्त्वस्य प्र
तिघातकृत् असाधारणस्यापलापी दासीगर्भविनाशकृत् ३३ पितृपुत्रस्वसृभ्रातृदंपत्याचार्यशिष्यकाः
एषामपतितान्योन्यत्यागी च शतदंडभाक् ३४ वसानस्त्रीन्पणान्दंड्यो नेजकस्तु परांशुकं विक्रयाविक्रयाधाने
याचितेषु पणान्दश ३५ पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः तुलाशासनमानानां कूटकृन्नाणकस्य तु
३६ एभिश्च व्यवहर्ता यः स दाप्यो दममुत्तमं अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकं ३७ स नाणकपरीक्षी तु दाप्य
उत्तमसाहसं भिषङ्मिथ्याचरन्दाप्यस्तिर्यक्षु प्रथमं दमं ३८ मानुषे मध्यमं राजमानुषेषूत्तमं तथा अवध्यं यश्च बध्ना
ति वध्यं यश्च प्रमुंचति ३९ अप्राप्तव्यवहारं च स दाप्यो दममुत्तमं मानेन तुलया वापि योंऽशमष्टमकं हरेत् ४० दंड
स दाप्यो द्विशतं वृद्धौ हानौ च कल्पितं भेषजस्नेहलवणगंधधान्यगुडादिषु ४१ पण्येषु हीनं क्षिप्रे[illegible]पणान्दाप्य

या॰स्मृ॰ क्यःकुबंधेनप्रवासयेत् ९० शूद्रस्तथांत्यएवस्यादंत्यस्यार्यागमेवधः ऊनंवाप्यधिकंवापिलिखेद्योराजशा
२८ सनं ९१ पारदारिकचोरंवामुंचतोदंडउत्तमः अभक्ष्येणद्विजंदूष्यदंडउत्तमसाहसं ९२ मध्यमंक्षत्रियंवैश्यंप्र
थमंशूद्रमर्धिकं कूटस्वर्णव्यवहारीविमांसस्यचविक्रयी ९३ अंगहीनश्चकर्तव्योदाप्यश्चोत्तमसाहसं चतुःपाद सु
कृतोदोषोनापेहीतिप्रजल्पतः ९४ काष्ठलोष्ठेषुपाषाणबाहुयुग्मकृतस्तथा छिन्ननस्येनयानेनतथाभग्नयुगादि
ना ९५ पश्चाच्चैवापसरताहिंसनेस्वाम्यदोषभाक् शक्तोह्यमोचयन्स्वामीदंष्ट्रिणांशृंगिणांतथा ९६ प्रथमंसाहसंद
द्यात्विक्रुष्टेद्विगुणंतथा जारंचोरेत्यभिवदंदाप्यःपंचशतंदमं ९७ उपजीव्यधनंमुंचंस्तदेवाष्टगुणीकृतं राज्ञोनिष्टप्र
वक्तारंतस्यैवाक्रोशकारिणं ९८ तन्मंत्रस्यचभेत्तारंछित्वाजिह्वांप्रवासयेत् मृतांगलग्नविक्रेतुर्गुरोस्ताडयितुस्त
था ९९ राजयानासनारोढुर्दंडोमध्यमसाहसः द्विनेत्रभेदिनोराजद्विष्टादेशकृतस्तथा १०० विप्रत्वेनचशूद्र
स्यजीवतोष्टशतोदमः दुर्दृष्टांस्तुपुनर्दृष्ट्वाव्यवहारान्नृपेणच १०१ सभ्याःसजयिनोदंड्याविवादाद्द्विगुणंपृथक् योम २८
न्येताजितोस्मीतिन्यायेनापिपराजितः २ तमायांतंपुनर्जित्वादापयेद्द्विगुणंदमं राज्ञान्यायेनयोदंडोगृहीतोवरुणाय

ते १०३ निवेद्यदद्याद्विप्रेभ्यस्त्रयस्त्रिंशद्गुणीकृतं १०४ ॥ ॥इतिश्रीयाज्ञवल्कीयेधर्मशास्त्रेद्वितीयोध्या
यः॥ ॥ऊनद्विवर्षंनिखनेन्नकुर्यादुदकंयतः आश्मशानादनुव्रज्यइतरोज्ञातिभिर्मृतः १ यमसूक्तंतथागाथाज
पद्भिर्लौकिकाग्निना सदग्धव्यउपेतश्चेदाहिताग्न्यावृतार्थवत् २ सप्तमाद्दशमाद्वापिज्ञातयोभ्युपयंत्यपः अपनः
शोशुचदघमनेनपितृदिङ्मुखाः ३ एवंमातामहाचार्यप्रेतानामुदकक्रिया कामोदकंसखिप्रत्ताश्वस्रीयश्वशुरर्त्विजां ४
सकृत्प्रसिंचत्युदकंनामगोत्रेणवाग्यताः नब्रह्मचारिणःकुर्युरुदकंपतितास्तथा ५ पाखंड्यनाश्रितास्तेनाभर्तृघ्न्यःका
मगाःस्त्रियः सुराप्यआत्मघातिन्योनाशौचोदकभाजनाः ६ कृतोदकान्समुत्तीर्णान्मृदुशाद्वलसंस्थितान् स्नातानपव
देयुस्तानितिहासैःपुरातनैः ७ मानुष्येकदलीस्तंभनिःसारेसारमार्गणं यःकरोतिससंमूढोजलबुद्बुदसन्निभे ८
पंचधासंभृतःकायोयदिपंचत्वमागतः कर्मभिःस्वशरीरोत्थैस्तत्रकापरिवेदना ९ गंत्रीवसुमतीनाशमुदधिर्दैवतानिच
फेनप्रख्यःकथंनाशंमर्त्यलोकोनयास्यति श्लेष्माश्रुबांधवैर्मुक्तंप्रेतोभुंक्तेयतोवशः अतोनरोदितव्यंहिक्रियाःकार्याः
स्वशक्तितः ११ इतिसंश्रुत्यगच्छेयुर्गृहंबालपुरःसराः विदश्यनिंबपत्राणिनियताद्वारिवेश्मनः १२ आचम्याग्न्यादि

या॰स्मृ॰ सलिलं गोमयं गौरसर्षपान्‌श्च। प्रविशेयुः समालभ्य कृत्वानि — पदंशनैः १३ प्रवेशनादिकं कर्म प्रेतसं
२८ स्पर्शिनामपि इच्छतां तत्क्षणाच्छुद्धिं परेषां प्राणसंयमात् १४ आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती सं
कटान्नं च नाश्नीयान्न च तैः सह संविशेत् १५ क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक्पृथक् पिंडयज्ञावृता
देयं प्रेतायान्नं दिनत्रयं १६ जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये वैतानोपासनाः कार्याः क्रियाश्च श्रुति
चोदनात् १७ त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ऊनद्विवर्ष उभयोः सूतकं मातुरेव हि १८ अंतरा जन्मम
रणे शेषाहोभिर्विशुध्यति गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणं १९ हतानां नृपगोविप्रैरन्वक्षं चात्मघाति
नां प्रोषिते कालशेषः स्यात्पूर्णे दत्वोदकं शुचिः २० क्षत्रस्य द्वादशाहानि विशः पंचदशैव तु त्रिंशद्दिनानि शूद्रस्य
तदर्धं न्यायवर्तिनः २१ अहस्त्वदत्तकन्यासु बालेषु च विशोधनं गुर्वंतेवास्यनूचानमातुलश्रोत्रियेषु च २२
अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च निवासराजनि प्रेते तदहः शुद्धिकारणं २३ महीपतीनां नाशौचं हतानां वि २८
द्युता तथा गोब्राह्मणार्थे संग्रामे यस्य चेच्छति भूमिपः २४ ब्राह्मणेनानुगंतव्यो न शूद्रो न द्विजः क्वचित् अनुगम्या

लहं सूतबांधवाः ७७ प्रष्टव्या योषितश्चास्य परपुंसि रताः पृथक् स्त्रीद्रव्यवृत्तिकामो वा केन चायं गतः स
ह ७८ मृत्युदेशे समासन्नं पृच्छेद्वापि जनं शनैः क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः ७९ राजपत्न्यभिगामी च
दग्धव्यास्तु कटाग्निना पुमान्संग्रहणे ग्राह्यः केशाकेशि परस्त्रिया ८० सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा
नीवीस्तनप्रावरणसक्थिकेशावमर्दनं ८१ अदेशकालसंभाषं सहैकस्थानमेव च स्त्रीनिषेधे शतं दद्याद्द्विशतं तु द
मं पुमान् ८२ प्रतिषेधे तयोर्दंडो यथा संग्रहणे तथा स्वजातावुत्तमो दंड आनुलोम्ये तु मध्यमः ८३ प्रातिलोम्ये वधः
पुंसो नार्याः कर्णादिकर्तनं अलंकृतां हरन्कन्यामुत्तमं ह्यन्यथाधमं ८४ दंडं दद्यात्सवर्णासु प्रातिलोम्ये वधः स्मृतः
सकामास्वनुलोमासु न दोषस्त्वन्यथाधमः ८५ दूषणे तु करच्छेद उत्तमायां वधः स्मृतः शतं स्त्रीदूषणे दद्याद्द्वे तु मि
च्छ थ्याभिशंसने ८६ पशुं वा शतं दाप्यो हीनां स्त्रीं गां च मध्यमं अवरुद्धासु — दासीषु भुजिष्यासु तथैव च ८७ गम्यास्व
पि पुमान्दाप्यः पंचाशत्पणिकं दमं प्रसह्य दास्यभिगमे दंडो दशपणः स्मृतः ८८ बहूनां यद्यकामासौ चतुर्विंशतिकः
पृथक् अयोनौ गच्छतो योषां पुरुषं वापि मेहतः ८९ चतुर्विंशतिको दंडस्तथा प्रव्रजितागमे अंत्याभिगमने त्वं

या·स्मृ· तीः ३ कौशेयनीललवणमांसैकशफसीसकान् शाकार्द्रौषधिपिण्याकपशुगंधांस्तथैवच ४ वैश्यवृत्त्यापि
३० जीवन्नो विक्रीणीतकदाचन धर्मार्थंविक्रयंनेयास्तिलाधान्येनतत्समाः ५ लाक्षालवणमांसानितपनीया
निविक्रये पयोदधितथामद्यंहीनवर्णकराणितु ६ आपद्गतः संप्रगृह्णन् भुंजानोपियतस्ततः नलिप्येनसा पदे
विप्रोज्वलनार्कसमोहिसः ७ कृषिःशिल्पंभृतिर्विद्याकुसीदंशकटंगिरिः सेवानूपंनृपोभैक्षमापत्तौजीवना
नितु ८ बुभुक्षितस्त्र्यहंस्थित्वाधान्यमब्राह्मणाद्धरेत् प्रतिगृह्यतदाख्येयमभियुक्तेनधर्मतः ९ तस्यवृत्तं
कुलंशीलंश्रुतमध्ययनंतपः ज्ञात्वाराजाकुटुंबंचधर्म्यांवृत्तिंप्रकल्पयेत् १० इत्यापद्धर्मप्रकरणं सुतविन्य
स्तपत्नीकस्तयावानुगतोवनं वानप्रस्थोब्रह्मचारीसाग्निःसोपासनोव्रजेत् १ अफालकृष्टेनाग्नींश्चपितॄन्देवा
तिथीनपि भृत्यांश्चतर्पयेच्छ्मश्रुजटालोमभृदात्मवान् २ अह्नोमासस्यषण्णांवातथासंवत्सरस्यवा अर्थस्य ण्णा
संचयंकुर्यात्कृतमाश्वयुजेत्यजेत् ३ दांतस्त्रिषवणस्नायीनिवृत्तश्चप्रतिग्रहात् स्वाध्यायवान्दानशीलः ३०

सर्वसत्वहितेरतः ४ दंतोलूखलिकःकालपक्वाशीवाश्मकुट्टकः श्रौतंस्मार्तंफलस्नेहैःकर्मकुर्यात्क्रियास्त
था ५ चांद्रायणैर्नयेत्कालंकृच्छ्रैर्वावर्तयेत्सदा पक्षेगतेवाप्यश्नीयान्मासेवाहनिवागते ६ स्वपेद्भूमौशुची
रात्रौदिवासंप्रपदैर्नयेत् स्थानासनविहारैर्वायोगाभ्यासेनवाप्युनः ७ ग्रीष्मेपंचाग्निमध्यस्थोवर्षासुस्थंडिले
शयः आर्द्रवासास्तुहेमंतेशक्त्यावापितपश्चरेत् ८ यःकंटकैर्वितुदतिचंदनैर्यश्चलिंपति सक्रुद्धोपरितुष्टश्चस
मस्तस्यचतस्यच ९ अग्नीन्वाप्यात्मसात्कृत्वावृक्षावासोमिताशनः वानप्रस्थगृहेष्वेवयात्रार्थंभैक्षमाचरेत्
१० ग्रामादाहृत्यवाग्रासानष्टौभुंजीतवाग्यतः वायुभक्षःप्रागुदीचींगच्छेद्वावर्ष्मसंक्षयात् ११ इतिवानप्रस्थ
प्रकरणं ॥ वनाद्गृहाद्वाकृत्वेष्टिंसर्ववेदसदक्षिणां प्राजापत्यांतदंतेतानग्नीनारोप्यचात्मनि १ अधीतवेदोज
पकृत्पुत्रवानन्नदोऽग्निमान् शक्त्याचयज्ञकृन्मोक्षेमनःकुर्यात्तुनान्यथा २ सर्वभूतहितःशांतस्त्रिदंडीसक
मंडलुः एकारामःपरिव्रज्यभिक्षार्थीग्राममाश्रयेत् ३ अप्रमत्तश्चरेद्भैक्षंसायाह्नेनभिलक्षितः रहितेभि

या॰ स्मृ॰ क्षुकैर्ग्रामे यात्रामात्रमलोलुपः ४ यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च सलिलं शुद्धिरेतेषां गोवालै
३१ श्चावघर्षणं ५ संनिरुद्ध्येंद्रियग्रामं रागद्वेषौ प्रहाय च भयं हित्वा च भूतानाममृती भवति द्विजः ६ कर्त्तव्याश
यशुद्धिश्च भिक्षुकेण विशेषतः ज्ञानोत्पत्तिनिमित्तत्वात्स्वातंत्र्यकरणाय च ७ अवेक्ष्या गर्भवासाश्च कर्मजाग
तयस्तथा आधयो व्याधयः क्लेशा जरारूपविपर्ययः ८ जवो जातिसहस्रेषु प्रियाप्रियविपर्ययः ध्यानयोगेन
संदृश्य सूक्ष्म आत्मनि चावस्थितः ९ नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः अतो यदात्मनो पथ्यं परेषां न तदाच
रेत् १० सत्यमस्तेयमक्रोधो ह्रीः शौचं धीर्धृतिर्दमः संयतेंद्रियता विद्या धर्मः सर्व उदाहृतः ११ निःसरंति यथा
लोहपिंडात्तप्तात्स्फुलिंगकाः सकाशादात्मनस्तद्वदात्मनः प्रभवंति हि १२ तत्रात्मा हि स्वयं किंचित्कर्म किंचित्स्व
भावतः करोति किंचिदभ्यासाद्धर्माधर्मोभयात्मकं १३ निमित्तमक्षरः कर्त्ता बोधा ब्रह्म गुणी वशी अजः श ३१
रीरग्रहणात्स जात इति कीर्त्यते १४ सर्गादौ स यथाकाशं वायुं ज्योतिर्जलं महीं सृजत्येकोत्तरगुणांस्तथादत्ते

भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक्शुचिः २५ ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतां सत्रिव्रतिब्रह्मचारिदात
ब्रह्मविदां तथा २६ दाने विवाहे यज्ञे च संग्रामे देशविप्लवे आपद्यपि च कष्टायां सद्यः शौचं विधीयते २७ पित्रोस्तुस
तकं मातुस्तद्दस्रकदर्शनाद्ध्रुवं तदहर्न प्रदुष्येत पूर्वेषां जन्मकारणात् २८ उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृ
शेत् अब्लिंगानि जपेच्चैव गायत्रीं मनसा सकृत् २९ कालोग्निः कर्ममृद्वायुर्मनो ज्ञानं तपो जलं पश्चात्तापो निराहारः
सर्वेमी शुद्धिहेतवः ३० अकार्यकारिणां दानं वेगो नद्याश्च शुद्धिकृत् शोध्यस्य मृच्च तोयं च सन्यासो वै द्विजन्मनां
३१ तपो वेदविदां क्षांतिर्विदुषां वर्ष्मणो जलं जपः प्रच्छन्नपापानां मनसः सत्यमुच्यते ३२ भूतात्मनस्तपो विद्ये बुद्धे
र्ज्ञानं विशोधनं क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता ३३ इत्याशौचप्रकरणं क्षात्रेण कर्मणा जीवेद्विशां वा
प्यापदि द्विजः निस्तीर्य तामथात्मानं पावयित्वा न्यसेत्पथि १ फलोपलक्षौमसोममनुष्यापूपवीरुधः तिलौद
नरसक्षारान्दधि क्षीरं घृतं जलं २ शस्त्रासवमधूच्छिष्टमधु लाक्षाश्च बर्हिषः मृच्चर्मपुष्पकुतपकेशतक्रविषक्षि

या. स्मृ. ३२ र्भेः प्राणैर्वियुज्यते २७ नवमे दशमे वापि प्रबलैः सूतिमारुतैः निःसार्यते बाण इव यंत्रच्छिद्रेण सज्वरः २८ त
स्य षोढा शरीराणि षट्त्वचो धारयंति हि षडंगानि तथास्थ्नां च सह षष्ट्या शतत्रयं २९ स्थानैः सह चतुःषष्टिर्दं
ता वै विंशतिर्नखाः पाणिपादशलाकाश्च तासां स्थानचतुष्टयं ३० चत्वार्यरत्निकास्थीनि जंघयोस्तावदेव तु
षष्ठ्यंगुलानां द्वे पार्ष्ण्ये गुल्फेषु च चतुष्टयं ३१ द्वे द्वे जानुकपोलोरूफलकांससमुद्भवे अक्ष्णोस्तालूषके श्रोणिफ
लके च विनिर्दिशेत् ३२ भगास्थ्येकं तथा पृष्ठे चत्वारिंशाच्च पंच च ग्रीवा पंचदशास्थीनि जत्र्वेकैकं तथा हनु तन्मू
ले द्वे ललाटाक्षिगंडे नासा घनास्थिके पार्श्वकाः स्थालकैः सार्धमर्बुदैश्च द्विसप्तति ३८ द्वौ शंखकौ कपालानि चत्वा
रि शिरसस्तथा उरः सप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः ३६ गंधरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः नासिका
लोचने जिह्वा त्वक् श्रोत्रं चेंद्रियाणि च ३७ हस्तौ पायुरुपस्थं च वाक् च पादौ तु पंच ते कर्मेंद्रियाणि जानीयान्मनश्चै
श्चैवोभयात्मकं ३८ नाभिरोजो गुदः शुक्रं शोणितं शंखकौ तथा मूर्धांसकंठहृदयं प्राणस्यायतनानि च ३९ ३२

वपा वसा वहननं नाभिः क्लोम यकृत्प्लिहा क्षुद्रांत्रं वृक्कसौ बस्तिः पुरीषाधानमेव च ३९ आमाशयोथ हृ
दयं स्थूलांत्रं गुद एव च उत्तरौ तु गुदौ कोष्ठौ विस्तरोयमुदाहृतः ४० कनीनिके चाक्षिकूटे शष्कुली कर्णपुत्रके गंडौ
शंखौ भ्रुवौ दंतावेष्टौ वोष्ठौ ककुंदरौ ४१ वंक्षणौ वृषणौ वृक्कौ श्लेष्मसंघातिनौ स्तनौ उपजिह्वा स्फिजौ बाहू जंघोरुषु
च पिंडिका ४२ तालूदरं बस्तिशीर्षं चिबुकं गलशुंडिके अवटुश्चैवमेतानि स्थानान्यत्र शरीरके ४३ अक्षिवर्त्म च
तुष्कं च पद्मस्तहृदयानि च नव छिद्राणि तान्येव प्राणस्यायतनानि तु ४४ शिराः शतानि सप्तैव नव स्नायुशतानि च
धमनीनां शते द्वे तु पंच पेशीशतानि च ४५ एकोनत्रिंशल्लक्षाणि तथा शैन वशतानि च षट्पंचाशच्च जानीयात्सिरा
धमनिसंज्ञिताः ४६ त्रयो लक्षास्तु विज्ञेयाः केशश्मश्रुनखानि च सप्तोत्तरं मर्मशतं द्वे च संधिशते तथा ४७ रोम्णां
कोट्यस्तु पंचाशच्चतस्रः कोट्य एव च सप्तषष्टिस्तथा लक्षाः सार्धाः स्विदायनैः सह ४७ वायवीयैर्विगण्यंते विभ
क्ताः परमाणवः यद्यप्येकोनुवेदेषां भावानां चैव संस्थितिं ४८ रसस्य नव विज्ञेया जलस्यांजलयो दश सप्तैव तु

पुरीषस्य रक्तस्याष्टौ प्रकीर्त्तिताः ४९ षट्श्लेष्मापंचपित्तंचचत्वारोमूत्रमेवच रसास्त्रयोद्वौतुमेदोमज्जैकोर्ध्वं
तुमस्तके ५० श्लेष्मौजसस्तावदेवरेतसस्तावदेवतु इत्येतदस्थिरंवर्ष्मयस्यमोक्षायकृत्यसौ ५१ द्वासप्ततिस
हस्राणिहृदयादभिनिःसृताः हितानामहितानाड्यस्तासांमध्येशशिप्रभं ५२ मंडलंतस्यमध्यस्थआत्मादीपइ
वाचलः सज्ञेयस्तंविदित्वेहपुनराजायतेनतु ५३ ज्ञेयंचारण्यकमहंयदादित्यादवाप्तवान् योगशास्त्रंचमत्प्रो
क्तंज्ञेयंयोगमभीप्सता ५४ अनन्यविषयंकृत्वामनोबुद्धिस्मृतींद्रियं तत्तोध्येयःस्थितोयोसौहृदयेदीपवत्प्रभुः
५५ यथाविधानेनपठन्सामगायमविच्युतं सावधानस्तथाभ्यासात्परंब्रह्माधिगच्छति ५६ अपरांतकमुल्लोप्य
मद्रकंप्रकरीतथा कुवेणकंसरोवेदमुत्तरंगीतकानिच ५७ ऋग्गाथापाणिकादक्षविहिताब्रह्मगीतिका गेयमेत
त्तदभ्यासकरणात्मोक्षसंज्ञितं ५८ वीणावादनतत्त्वज्ञःश्रुतिजातिविशारदः तालज्ञश्चाप्रयासेनमोक्षमार्गंनि
गच्छति ५९ गीतज्ञोयदिगीतेननाप्नोतिपरमंपदं रुद्रस्यानुचरोभूत्वासहतेनैवमोदते ६० अनादिरात्माकथि ३२

भवन्नपि १५ आद्यस्याप्यायनेसूर्यःसूर्याद्वृष्टिरथौषधीः तदन्नंरसरूपेणशुक्रत्वमुपगच्छति १६ स्त्रीपुंस
योस्तुसंयोगेविशुद्धेशुक्रशोणिते पंचधातून्स्वयंषष्ठआदत्तेयुगपत्प्रभुः १७ इंद्रियाणिमनःप्राणोज्ञानमायुःसु
खंधृतिः धारणाप्रेरणंदुःखमिच्छाहंकारएवच १८ प्रयत्नआकृतिर्वर्णःस्वरद्वेषौभवाभवौ तस्यैतदात्मजंसर्वम
नादेरादिमिच्छतः १९ प्रथमेमासिसंक्लेदभूतोधातुविमूर्छितः मास्यर्बुदंद्वितीयेतुतृतीयेंगेंद्रियैर्युतः २० आकाशा
ल्लाघवंसौक्ष्म्यंशब्दंश्रोत्रंबलादिकं वायोस्तुस्पर्शनंचेष्टांव्यूहनंरौक्ष्यमेवच २१ पित्तात्तुदर्शनंपक्तिमौष्ण्यंरूप
प्रकाशनं रसात्तुरसनंशैत्यंस्नेहंक्लेदंसमार्दवं २२ भूमेर्गंधंतथाघ्राणंगौरवंमूर्त्तिमेवच आत्मागृह्णात्यजःसर्वंतृतीये
स्पंदतेततः २३ दौर्हृदस्याप्रदानेनगर्भोदोषमवाप्नुयात् वैरूप्यंमरणंवापितस्मात्कार्यंप्रियंस्त्रियाः २४ स्थैर्यंचतु
र्थेत्वंगानांपंचमेशोणितोद्भवः षष्ठेबलस्यवर्णस्यनखरोम्णांचसंभवः २५ मनश्चैतन्ययुक्तोसौनाडीस्नायुशिरो
युतः सप्तमेचाष्टमेचैवत्वग्युक्तःस्मृतिमानपि २६ पुनर्गर्भंपुनर्धात्रीमोजस्तस्यप्रधावति अष्टमेमास्यतोजातोग

र ७२ यद्येवं स कथं ब्रह्मन् पापयोनिषु जायते ईश्वरः स कथं भावैरनिष्टैः संप्रयुज्यते ७३ करणैरन्वित
स्यापि पूर्वज्ञानं कथं च न वेत्ति सर्वगतां कस्मात्सर्वगोपि न वेदनां ७४ अंत्यपक्षिस्थावरतां मनोवाक्कायकर्म
जैः दोषैः प्रयाति जीवोयं भवयोनिशतेषु च ७५ अनंता हि यथा भावाः शरीरेषु शरीरिणां रूपाण्यपि तथैवेह
सर्वयोनिषु देहिनां ७६ विपाकः कर्मणां प्रेत्य केषांचिदिह जायते इह चामुत्र चैकेषां भावस्तत्र प्रयोजनं ७७
परद्रव्याण्यभिध्यायंस्तथानिष्टानि चिंतयन् वितथाभिनिवेशी च जायतेंत्यासु योनिषु ७८ पुरुषोनृतवादी
च पिशुनः पुरुषस्तथा असंबंधप्रलापी च मृगपक्षिषु जायते ७९ अदत्तादाननिरतः परदारोपसेवकः हिंसक
श्चाविधानेन स्थावरेष्वभिजायते ८० आत्मज्ञः शौचवान्दांतः तपस्वी विजितेंद्रियः कर्मकृद्वेदविद्याभिः सात्वि
कोदेवयोनितां ८१ असत्कार्यरतोधीरआरंभी विषयी च यः स राजसो मनुष्येषु मृतो जन्माधिगच्छति ८२ निद्रा ३४
लुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा प्रमादवान्भिन्नवृत्तो भवेत्तिर्यक्षु तामसः ८३ तेजसा तमसा चैव समा

विष्टोभ्रमन्निह भावैरनिष्टैः संयुक्तः संसारं प्रतिपद्यते ८४ मलिनो हि यथादर्शो रूपालोकनमक्षमः त
था विपक्वकरण आत्मज्ञानस्य न क्षमः ८५ कट्वेर्वारौ यथापक्के मधुरः सन्रसोपि न प्राप्यते चात्मनि तथा नाप
क्वकरणा ज्ञता ८६ सर्वाश्रयां निजे देहे देही विंदति वेदनां योगी मुक्तश्च सर्वासां यो न वाप्नोति वेदनां ८७ आकाश
मेकं हि यथा घटादिषु पृथग्भवेत् तथात्मैकोप्यनेकश्च जलाधारेष्विवांशुमान् ८८ ब्रह्मखानिलतेजांसि जलं भू
श्चेति धातवः इमे लोका एष आत्मा तस्माच्च सचराचरं ८९ मृद्दंडचक्रसंयोगात्कुंभकारो यथा घटं करोति तृणमृ
त्काष्ठैर्गृहं वा गृहकारकः ९० हेममात्रमुपादाय रूपं वा हेमकारकः निजलालासमायोगात्कोशं वा कोशकारकः ९१
कारणान्येवमादाय तासु तास्विह योनिषु सृजत्यात्मानमात्मैवं संभूय कारणानि च ९२ महाभूतानि सत्यानि यथा
त्मापि तथैव हि कोन्यथैकेन नेत्रेण दृष्टमन्येन पश्यति ९३ वाचं वा को विजानाति पुनः संश्रुत्य संश्रुतं अतीतार्थस्मृ
तिः कस्य को वा स्वप्नस्य कारकः ९४ जातिरूपवयोवित्तविद्यादिभिरहंकृतः शब्दादिविषयोद्योगं कर्मणा मनसा गि

या॰स्मृ॰ रा ९५ ससंदिग्धमतिः कर्मफलमस्तिनवेत्तिवा विप्लुतः सिद्धमात्मानमसिद्धोपिनमन्यते ९६ ममदाराः
३५ सुतामात्या अहमेषामितिस्थितिः हिताहितेषुभावेषु विपरीतमतिस्तथा ९७ ज्ञेयज्ञेप्रकृतौचैव विकारेचावि
शेषवान् अनाशकानलापातजलप्रपतनोद्यमी ९८ एवंवृत्तोविनीतात्मा वितथाभिनिवेशवान् कर्मणाद्वेषमो
हाभ्यामिच्छयाचैवबाध्यते ९९ आचार्योपासनंचैवशास्त्रार्थेषु विवेकता तत्कर्मणामनुष्ठानंसंगः सद्भिर्गि
रःशुश्रुताः १०० स्त्र्यालोकालंभविगमः सर्वभूतात्मदर्शनं त्यागः परिग्रहाणांचजीर्णकाषायधारणं १०१ विष
येंद्रियसंरोधोनिद्रालस्यविसर्जनं शरीरपरिसंख्यानंप्रवृत्तिष्वघदर्शनं १०२ नीरजस्तमसासत्वंशुद्धिर्निस्पृह
ताशमः एतैरुपायैः संशुद्धः सत्वयोग्यमृतीभवेत् १०३ तत्रस्मृतेरुपस्थानात्सत्वयोगात्परिक्षयात् कर्मणां
सन्निकर्षाच्चसतांयोगः प्रवर्त्तते १०४ शरीरसंक्षयेयस्यमनः सत्वस्थमीश्वरं अविप्लुतः स्मृतिः सम्यक्सजाति
स्मरतामियात् ५ यथाहिभरतोवर्णैर्वर्णयत्यात्मनस्तनुं नानारूपाणिकुर्वाणस्तथात्माकर्मजास्तनूः १०६ ३५

त स्तस्यादिस्तुशरीरकं आत्मनश्चजगत्सर्वंजगतश्चात्मसंभवः ६१ कथमेतद्विमुह्यामः सदेवासुरमानु
षं जगदुद्भूतमात्माचकथंतस्मिन्वदस्वनः ६२ मोहजालमपास्येहपुरुषोदृश्यतेह्ययः सहस्रकरपन्नेत्रसूर्यवर्चाः
सहस्रकः ६३ सआत्माचैवयज्ञश्चविश्वरूपः प्रजापतिः विरजाः सोन्नरूपेणयज्ञत्वमुपगच्छति ६४ योद्रव्यदेवतात्या
गसंभूतोरसउत्तमः देवान्संतर्प्यसरसोयजमानंफलेनच ६५ संयोज्यवायुनासोमंनीयतेरश्मिभिस्ततः ऋग्यजुः
सामविहितंसौरंधामोपनीयते ६६ तन्मंडलादसौसूर्यः सृजत्यमृतमुत्तमं यज्जन्मसर्वभूतानामशनानशनात्म
नां ६७ तस्मादन्नात्पुनर्यज्ञः पुनरन्नंपुनः क्रतुः एवमेतदनाद्यंतंचक्रंसंपरिवर्त्तते ६८ अनादिरात्मासंभूतिर्वि
द्यतेनांतरात्मनः समवायीतपुरुषोमोहेच्छाद्वेषकर्मजः ६९ सहस्रात्ममयोयोवआदिदेवउदाहृतः मुखबा
हूरुपज्जाः स्युस्तस्यवर्णायथाक्रमं ७० पृथिवीपादतस्तस्यशिरसोद्यौरजायत मनः प्राणाद्दिशः श्रोत्रात्
स्पर्शाद्वायुर्मुखाच्छिखी ७१ मनसश्चंद्रमाजातश्चक्षुषश्चदिवाकरः जघनादंतरिक्षंचजगच्चसचराचं

या॰स्मृ॰ निर्मेधाद्वेषोबुद्धिःस्मरणंधृतिः इंद्रियांतरसंचारइच्छाधारणजीविते ११९ सर्गःस्वप्नश्चभावानांप्रेरणंमनसो
३६ गतिः १२० निमेषश्चेतनायत्न आदानंपांचभौतिकं एते एतानिलिंगानिदृश्यंते परमात्मनः तस्माद्स्तिपरोदेहा
दात्मासर्वगईश्वरः १२१ बुद्धींद्रियाणि सर्वाणिमनःकर्मेंद्रियाणिच अहंकारश्चबुद्धिश्चपृथिव्यादीनिचैवहि १२२
अव्यक्तआत्माक्षेत्रज्ञः क्षेत्रस्यास्यनिगद्यते ईश्वरःसर्वभूतस्थःसन्नसत्सदसच्चयः १२३ बुद्धेरुत्पत्तिरव्यक्तात्ततोहं
कारसंभवः तन्मात्रादीन्यहंकारादेकोत्तरगुणानिच १२४ शब्दस्पर्शश्चरूपंचरसोगंधश्चतद्गुणाः योयस्मान्निःसृ
तश्चैषांसतस्मिन्नेवलीयते १२५ यथात्मानंसृजत्यात्मा तथावःकथितंमया विपाकात्रिप्रकाराणांकर्मणामीश्वरोपि
सन् १२६ सत्वंरजस्तमश्चैवगुणाःस्तस्यैवकीर्त्तिताः रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यतेह्यसौ १२७ अनादिरा
दिमांश्चैवसएवपुरुषःपरः लिंगेंद्रियग्राह्यरूपःसविकारउदाहृतः १२८ पितृयानोजवीथ्याश्चयदगस्त्यस्यचांतरं
तेनाग्निहोत्रिणोयांतिस्वर्गकामादिवंप्रति १२९ येचदानपराःसम्यगष्टभिश्चगुणैर्युताः तेपितेनैवगच्छंतिसत्यव्रतप ३६

रायणाः १३० अष्टाशीतिसहस्राणिमुनयोगृहमेधिनः पुनरावर्त्तिनोबीजभूताधर्मप्रवर्त्तकाः १३१ सप्तर्षिना
गवीथ्यंतंदेवलोकंसमाश्रिताः तावंतएवमुनयःसर्वारंभविवर्जिताः ३२ तपसाब्रह्मचर्येणसंगत्यागेनमेधया तत्रगत्वा
वतिष्ठंतेयावदाभूतसंप्लवं १३३ यतोवेदाःपुराणानिविद्योपनिषदस्तथा श्लोकाःसूत्राणिभाष्याणियच्चकिंचनवाङ्म
यं १३४ वेदानुवचनंयज्ञोब्रह्मचर्यंतपोदमः श्रद्धोपवासःस्वातंत्र्यमात्मनोज्ञानहेतवः १३५ सह्याश्रमैर्विजिज्ञास्यः
समस्तैरेवमेवतु द्रष्टव्यस्त्वथमंतव्यःश्रोतव्यश्चद्विजातिभिः १३६ यएवमेवंविंदंतियेचारण्यकमाश्रिताः उपासतेद्वि
जाःसत्यंश्रद्धयापरयायुताः ३७ क्रमात्तेसंभवंत्यर्चिरहःशुक्लंतथोत्तरं अयनंदेवलोकंचसवितारंसवैद्युतं १३८
ततस्तान्पुरुषोभ्येत्यमानसोब्रह्मलौकिकान् करोतिपुनरावृत्तिस्तेषामिहनविद्यते १३९ यज्ञेनतपसादानैर्योहिस्वर्ग
जितोनराः धूमंनिशांकृष्णपक्षंदक्षिणायनमेवच पितृलोकंचंद्रमसंनाड्यौवर्षिंजलंमहीं क्रमात्तेसंभवंतीहपुनरेवव्रजं
तिच १४१ एतद्योनविजानातिमार्गद्वितयमात्मवान् दंदशूकःपतंगोवाभवेत्कीटोथवाकृमिः १४२ ऊरुस्थोत्ता

या॰स्मृ॰ नचरणः सव्येन्यस्येतरं करं उत्तानं किंचिदुन्नम्य मुखं विष्टभ्य चोरसा १४३ निमीलिताक्षः सत्वस्थो दंतै
३७ र्दंतान संस्पृशन् तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः १४४ संनिरुध्येंद्रियग्रामं नातिनीचोच्छ्रितास
नः द्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमेत् ४५ ततो ध्येयः स्थितो योसौ हृदये दीपवत्प्रभुः धारयेत्तत्र चात्मानं धा
रणां धारयन्बुधः ४६ अंतर्धानं स्मृतिः कांतिर्दृष्टिः श्रोत्रज्ञता तथा निजं शरीरमुत्सृज्य परकायप्रवेशनं ४७ अर्थानां
छंदतः सृष्टिर्योगसिद्धेस्तु लक्षणं सिद्धे योगे त्यजन्देहममृतत्वाय कल्पते १४८ अथवाप्यभ्यसन्वेदं न्यस्तकर्मा वने व
सन् अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयात् १४९ न्यायागतधनस्तत्वज्ञाननिष्ठोतिथिप्रियः श्राद्धकृत्सत्यवा
दी च गृहस्थोपि विमुच्यते १५० इत्यध्यात्मप्रकरणं महापातकजान्घोरान्नरकान्प्राप्य दारुणान् कर्मक्षया
त्प्रजायंते महापातकिनस्त्विह १ मृगाश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति खरपुल्कसवेतानां सुरापो नात्र संशयः २
कृमिकीटपतंगत्वं स्वर्णहारी समाप्नुयात् तृणगुल्मलतात्वं च क्रमशो गुरुतल्पगः ३ यो येन संवसत्येषां स तल्लिंगो ३७

कालकर्मात्मबीजानां दोषैर्मातुस्तथैव च गर्भस्य वैकृतं दृष्टमंगहीनादि जन्मनः १०७ अहंकारेण मनसा गत्या कर्मफले
न च शरीरेण च नात्मायं मुक्तः पूर्वं कथंचन १०८ दाता सत्यः क्षमी प्राज्ञः शुभकर्मा जितेंद्रियः तपोरतो योगशीलो न रोगैर
भिभूयते १०९ वर्त्याधारस्नेहयोगाद्यथा दीपस्य संस्थितिः विक्रियापि च दृष्टैवमकाले प्राणसंक्षयः ११० अनंता रश्मय
स्तस्य दीपवद्यः स्थितो हृदि सितासिताव नीलासुसुनीला पीतलोहिताः १११ ऊर्ध्वमेकः स्थितो रश्मिर्यो भित्वा सूर्यमंडलं
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिं ११२ यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितं तेन देवशरीराणि सधामानि प्रपद्य
ते ११३ ये नैकरूपाश्चाधस्ताद्रश्मयोस्य मृदुप्रभाः इह कर्मोपभोगाय तैः संसरति सोवशः ११४ वेदैः शास्त्रैः सवि
ज्ञानैर्जन्मना मरणेन च आर्त्या गत्या तथागत्या सत्येन ह्यनृतेन च ११५ श्रेयसा सुखदुःखाभ्यां कर्मभिश्च शुभाशुभैः
निमित्तशाकुनज्ञानैर्ग्रहसंयोगजैः फलैः ११६ तारानक्षत्रसंचारैर्जागरैः स्वप्नजैरपि आकाशपवनज्योतिर्जलभूमि
धरैस्तथा ११७ मन्वंतरैर्युगप्राप्त्या मंत्रौषधिबलैरपि वित्तात्मानं विद्यमानं कारणं जगतस्तथा ११८ अहंकारः स्मृ

भिजायते अन्नहर्त्तामयावी स्यान्मूको वागपहारकः ४ धान्यमिश्रो तिरक्तांगः पिशुनः पूतिनासिकः तैलहर्त्ते
लपायी स्यात्पूतिवक्त्रस्तु सूचकः ५ परस्य योषितं हत्वा ब्रह्मस्वमपहृत्य च अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः ६
हीनजातौ प्रजायेत पररत्नापहारकः पत्रशाकं शिखी हत्वा गंधान्छुछुंदरिः शुभान् ७ मूषको धान्यहारी स्याद्यानमुष्ट्रफ
लंकपिः जलं प्लवः पयः काको गृहकारी ह्युपस्करं ८ मधु दंशः फलं गृध्रो गां गोधाग्निं बकस्तथा ।वश्वित्रीरसंश्वारसंतु
चीरी लवणहारकः ९ प्रदर्शनार्थमेतत्तु मयोक्तं स्तेनकर्मणि द्रव्यप्रकारा हि यथा तथैव प्राणिजातयः १० यथाकर्म फलं प्रा
प्य तिर्यक्त्वं कालपर्ययात् जायंते लक्षणभ्रष्टा दरिद्राः पुरुषाधमाः ११ ततो निष्कल्मषीभूताः कुले महति भोगिनः जायंते
विद्ययोपेता धनधान्यसमन्विताः १२ विहितस्याननुष्ठानान्निंदितस्य च सेवनात् अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छति
१३ तस्मात्तेनेह कर्त्तव्यं प्रायश्चित्तं विशुद्धये एवमस्यांतरात्मा च लोकश्चैव प्रसीदति १४ प्रायश्चित्तैरपैत्येनो यद्ज्ञा
नकृतं भवेत् कामतो व्यवहार्यस्तु वचनादिह जायते १५ प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः अपश्चात्तापिनः क

या॰स्मृ॰ स्तांनरकान्यांतिदारुणान् १६ तामिस्रलोहशंकुंच महारौरवशाल्मली रौरवंकुड्मलंपूतिमृत्ति
३८ कांकालसूत्रकं १७ संघातलोहितोदंतं सविषंसप्रतापनं महानिरयकाकोलंसंजीवनम
हापथं १८ अवीचिमंधतामिस्रंकुंभीपाकंतथैवच असिपत्रवनंचैवतपनंचैकविंशकं १९
महापातकजैर्घोरैरुपपातकजैस्तथा अन्वितायांत्यचरितप्रायश्चित्तानराधमाः २० ब्रह्म
हामद्यपस्तेनस्तथैवगुरुतल्पगः एतेमहापातकिनोयश्चतैःसहसंविशेत् २१ गुरूणामध्यधि
क्षेपोवेदनिंदासुहृद्वधः ब्रह्महत्यासमंज्ञेयमधीतस्यचनाशनं २२ निषिद्धभक्षणंजैह्ममुत्क
र्षेचवचोनृतं रजस्वलामुखास्वादःसुरापानसमानितु २३ अश्वरत्नमनुष्यस्त्रीभूधेनुहर
णंतथा निक्षेपस्यचसर्वंहिसुवर्णस्तेयसंमितं २४ सखिभार्याकुमारीषुस्वयोनिष्वंत्यजासुच ३८

सगोत्रासुसुतस्त्रीषुगुरुतल्पसमंविदुः २५ पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि मातुःसपत्नींभगि
नीमाचार्यतनयांतथा २६ आचार्यपत्नींतनयांगच्छंस्तुगुरुतल्पगः छित्वालिंगंवधस्तस्यसकामायास्त्रियाअपि
२७ गोवधोव्रात्यतास्तेयमृणानांचानपक्रिया अनाहिताग्नितापण्यविक्रयःपरिवेदनं २८ भृताद्ध्ययनादानंभृत
काध्यापनंतथा पारदार्यंपारिवित्त्यंवार्द्धुष्यंलवणक्रिया २९ स्त्रीशूद्रविट्क्षत्रवधोनिंदितार्थोपजीवनं नास्तिक्यंव्रत
लोपश्चसुतानांचैवविक्रयः ३० धान्यकुप्यपशुस्तेयमयाज्यानांचयाजनं पितृमातृसुतत्यागस्तडागारामविक्रयः ३१
कन्यासंदूषणंचैवपरिविंदकयाजनं कन्याप्रदानंतस्यैवकौटिल्यंव्रतलोपनं ३२ आत्मनोर्थेक्रियारंभोमद्यपस्त्रीनिषे
वणं स्वाध्यायाग्निसुतत्यागोबांधवत्यागएवच ३३ इंधनार्थंद्रुमच्छेदःस्त्रीहिंसौषधजीवनं हिंस्रयंत्रविधानंचव्यस
नान्यात्मविक्रयः ३४ असच्छास्त्राभिगमनंमाकरेष्वधिकारिता भार्यायाविक्रयश्चैषामेकैकमुपपातकं ३५ शिरः
कपालीध्वजवान्भिक्षाशीकर्मवेदयन् ब्रह्महाद्वादशाब्दानिमितभुक्शुद्धिमाप्नुयात् ३६ लोमभ्यःस्वाहेत्येवंहिलो

या॰स्मृ॰ लोमप्रभृतिवैतसुतं मज्जांतांजुहुयाद्वापि मंत्रैरेतैर्यथाक्रमं ३७ ब्राह्मणस्यपरित्राणाद्गवांद्वादशकस्यवा
३९ तथाश्वमेधावभृथस्नानाद्वाशुद्धिमाप्नुयात् ३८ दीर्घतीव्रामयग्रस्तंब्राह्मणंगामथापिवा दृष्ट्वापथिनिरातंकं
कृत्वावाब्रह्महाशुचिः ३९ आनीयविप्रसर्वस्वंहृतंघातितएववा तन्निमित्तेक्षतःशस्त्रैर्जीवन्नपिविशुध्यति ४०
अरण्येनियतोजप्त्वात्रिर्वैवेदस्यसंहितां शुध्येतायात्मिताशित्वात्प्रतिस्रोतःसरस्वतीं ४१ संग्रामेवाहतोलक्षी-
तःशुद्धिमवाप्नुयात् मृतकल्पःप्रहारार्त्तोजीवन्नपिविशुध्यति ४२ पात्रेधनंवापर्याप्तंदत्वाशुद्धिमवाप्नुयात्
आदातुश्चविशुध्यर्थमिष्टिर्वैश्वानरीमता ४३ यागस्थःक्षत्रविड्घातीचरेद्ब्रह्महणोव्रतं गर्भहाचयथावर्णंत
थात्रेयीनिषूदकः ४४ चरेद्व्रतमहत्वापिघातार्थंचेत्समागतः द्विगुणंसवनेस्थेतुब्राह्मणेव्रतमादिशेत् ४५ सुरां
बुघृतगोमूत्रपयसामग्निसंनिभं सुरापोन्यतमंपीत्वामरणाच्छुद्धिमाप्नुयात् ४६ बालवासाजटीवापिचरे
द्ब्रह्महणोव्रतं पिण्याकंवाकणान्वापीभक्षयेत्तुमहानिशि ४७ अज्ञानाद्वासुरांपीत्वारेतोविण्मूत्रमेववा पुनःसं ३९

स्कारमर्हंतित्रयोवर्णाद्विजातयः ३ पतिलोकंनसायातिब्राह्मणीयासुरांपिबेत् इहैवसाशुनीगृध्रीसूकरीचो
पजायते ४ ब्राह्मणःस्वर्णहारीतुराज्ञेमुसलमर्पयेत् स्वकर्मख्यापयंस्तेनहतोमुक्तोपिवाशुचिः ५ अनाख्यायन्नपि
शुध्येत्सुरापव्रतमाचरन् आत्मतुल्यंसुवर्णंवाददद्याद्वाविप्रतुष्टिकृत् ६ तप्तेयःशयनेसार्धमायस्यायोषितास्वपेत्
गृहीत्वोत्कृत्यवृषणौनैरृत्यांचोत्सृजेत्तनुं ७ प्राजापत्यंचरेत्कृच्छ्रंसमायागुरुतल्पगः चांद्रायणंवात्रीन्मासानभ्यस्य
न्वेदसंहितां ८ योभिस्तैःसंवसेद्योवैवत्सरंसोपितत्समः कन्यांसमुद्वहेदेषांसोऽपवासामकिंचनं ९ चांद्रायणंचरेत्स
र्वानवकृष्टानिहत्यतु शूद्रोधिकारहीनोपिकालेनानेनशुध्यति १० पंचगव्यंपिबेद्गोघ्नोमासमासीतसंयतः गोष्ठेश
योगोनुगामीगोप्रदानेनशुध्यति ११ कृच्छ्रंचैवातिकृच्छ्रंचचरेद्वापिसमाहितः दद्यात्त्रिरात्रंचोपोष्यवृषभैकादशास्तुगाः
उपपातकशुद्धिःस्यादेवंचांद्रायणेनतु पयसावापिमासेनपराकेणापिवापुनः १३ वृषभैकसहस्रागादद्यात्क्षत्रवधेपु
मान् ब्रह्महत्याव्रतंवापिवत्सरत्रितयंचरेत् १४ वैश्यहाब्दंचरेदेतद्दद्याद्वैकशतंगवां षण्मासाच्छूद्रहाप्येतदद्याद्वि

त्रिर्दशापिबा १५ दुर्वृत्ताब्रह्मविट्क्षत्रशूद्रयोषाःप्रमाप्यतु दृतिंधेनुंवस्तमविंकमाद्द्याद्विशुद्धये १६ अप्रदुष्टां
स्त्रियंहत्वाशूद्रहत्याव्रतंचरेत् अस्थिमतांसहस्रंतुतथानस्थिमतामनः १७ मार्जारगोधानकुलमंडूकाश्वपतत्रिणः
हत्वात्र्यहंपिबेत्क्षीरंकृच्छ्रंवापादिकंचरेत् १८ गजेनीलावृषाःपंचशुकेवत्सोविहायनः हंसस्येनकपिक्रव्याज्जलस्थ
लशिखंडिनः १९ भासंचहत्वादद्यात्गामक्रव्यादांस्तुवत्सिकां उरगेष्वायसोदंडःपंडकेत्रपुमानकः २० कालेघृतघ
टोदेयःउष्ट्रेगुंजाहयेंऽशुकं तित्तिरौतुतिलद्रोणंगजादीनामशक्नुवन् २१ दानंदातुंचरेत्कृच्छ्रमेकैकस्यविशुद्धये किं
चित्सास्थिवधेदेयंप्राणायामन–स्थिके २२ वृक्षगुल्मलतावीरुच्छेदनेजप्यमृक्शतं पुंश्चलीवानरखरैर्दष्टःश्वोष्ट्र
दिवायसैः २३ प्राणायामंजलेकृत्वाघृतंप्राश्यविशुध्यति फलपुष्पान्नरसजशस्त्रघातेघृताशनं २४ स्यादोषधी
वृथाछेदेक्षीराशीगोनुमंत्रयेत् स्नानांतरंशुवोर्वापितेनानापिकयास्पृशेत् २५ मयितेजइतिछायांस्वांदृष्ट्वांबुगतां ४०
जपेत् सावित्रीमशुचौदेशेचापल्येचानृतेपिवा २६ अवकीर्णीभवेद्गत्वाब्रह्मचारीतुयोषितं गर्दभंपशुमालभ्य

याःस्मल्पं स्याद्यच्चनोक्तानिष्कृतिः दासीकुंभं बहिर्ग्रामान्निनयेरन्स्वबांधवाः पतितस्य बहिः कुर्युः सर्वकार्येषु चैव
४१ तत् ४० चरितव्रत आयाते निनयेरन्नवं घटं जुगुप्सेयुर्नचाप्येनं संविशेयुश्च सर्वशः ४१ पतितानामेष एव विधिः
स्त्रीणां प्रकीर्त्तितः वासो गृहांतिके देयमन्नं वासः सरक्षणं ४२ नीचाभिगमनं गर्भपातनं भर्त्तृहिंसनं विशेषपतनी
यानि स्त्रीणामेतान्यपि ध्रुवं ४३ शरणागतबालस्त्रीहिंसकान्संवसेन्नतु चीर्णव्रतानपि सतः कृतसहितानिमान्
४४ घटेपवर्जिते ज्ञातिमध्यस्थो यवसं गवां प्रदद्यात्प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया ४५ विख्यातदोषः कुर्वी
त पर्षदोनुमतं व्रतं इति प्रकाशप्रायश्चित्तप्रकरणं अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत् ४६ त्रिरात्रोपोषि
तो जप्त्वा ब्रह्महा त्वघमर्षणं अंतर्जले विशुध्येत दत्वा गां च पयस्विनीं ४७ लोमभ्यः स्वाहेति वा दिवसं मारुताशनः
जले स्थित्वाभिजुहुयाच्चतुर्विंशद्घृताहुतीः ४८ त्रिरात्रोपोषितो हुत्वा कूष्मांडीभिर्घृतं शुचिः सुरापः स्वर्णहारी तु ४१
रुद्रजापी जले स्थितः ४९ सहस्रशीर्षेति जापी मुच्यते गुरुतल्पगः गौर्देया कर्मणोस्यांते पृथगेभिः पयस्विनी

कृत्वोपवासं रेतोविण्मूत्राणां प्राशने द्विजः प्राणायामशतं कार्यं सर्वपापापनुत्तये ५१ उपपातकजातानामना
दिष्टस्य चैव हि ॐकाराभिष्टुतं सोमसलिलं पावनं पिबेत् ५२ कृत्वा तु रेतोविण्मूत्रप्राशनं च द्विजोत्तमः निशायां वा
दिवा वापि यदज्ञानकृतं भवेत् ५३ त्रैकाल्यसंध्याकरणात्तत्सर्वं च प्रणश्यति यत्र यत्र च संकीर्णमात्मानं मन्यते द्वि
जः ५४ तत्र तत्र तिलैर्होमो गायत्र्या वाचनं तथा शुक्रियारण्यकजपो गायत्र्याश्च सहस्रशः ५५ सर्वपापहरा ह्ये
षा रुद्रैकादशिनी तथा वेदाभ्यासरतं क्षांतं महायज्ञक्रियापरं ५६ न स्पृशंतीह पापानि महापातकजान्यपि वायुभ
क्षो दिवा तिष्ठेद्रात्रिं नीत्वाप्सु सूर्यदृक् ५७ जप्त्वा सहस्रं गायत्र्याः शुध्येद्ब्रह्मवधादृते इत्युपपातकप्रायश्चित्तप्रक
णं ब्रह्मचर्यं दया क्षांतिर्दानं सत्यमकलुषं अहिंसास्तेयमाधुर्ये दमश्चेति यमाः स्मृताः स्नानमौनोपवासेज्यास्वा
ध्यायोपस्थनिग्रहाः ५८ नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमोदता गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं प्राश्या
परेह्न्युपवसेत्कृच्छ्रं शांतपनं चरेत् पृथक्सांतपनद्रव्यैः षडहः सोपवासकः सप्ताहेन तु कृच्छ्रोयं महासांतपनः स्मृ

या॰स्मृ॰ तः पर्णोदुंबरराजीवबिल्वपत्रकुशोदकैः ६२ प्रत्येकंप्रत्यहंपीतैः पर्णकृच्छ्र उदाहृतः तप्तक्षीरघृतांबूनामेकैकंप्र
४२ त्यहंपिबेत् ६३ एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनचैवायंपादकृ
च्छ्रः प्रकीर्त्तितः यथाकथंचित्त्रिगुणः प्राजापत्योयमुच्यते ६५ अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजकः कृच्छ्रातिकृ
च्छ्रः पयसा दिवसानेकविंशतिं ६६ द्वादशाहोपवासेन पराकः परिकीर्त्तितः पिण्याकचामतक्रांबुसक्तूनांप्रतिवा
सरं ६७ एकैकमुपवासश्च कृच्छ्रः सौम्योयमुच्यते एषांत्रिरात्रमभ्यासादेकैकस्ययथाक्रमं ६८ तुलापुरुषइत्येष
ज्ञेयः पंचदशाहिकः तिथिवृद्ध्याचरेत्पिंडान्गायत्र्याचानुमंत्रयेत् ६९ एकैकंह्रासयेत्कृष्णे पिंडंचांद्रायणंचरे
त् यथाकथंचित्पिंडानांचत्वारिंशच्छतद्वयं ७० मासेनैवोपभुंजीत चांद्रायणमथापरं कुर्यात्त्रिषवणस्नायी
कृच्छ्रंचांद्रायणंतथा ७१ पवित्राणिजपेत्पिंडान्गायत्र्याचानुमंत्रयेत् अनादिष्टेषुपापेषु शुद्धिश्चांद्रायणेन तु ४२
७२ धर्मार्थंयश्चरेदेतच्चंद्रस्यैतिसलोकतां कृच्छ्रकृद्धर्मकामस्तु महतींश्रियमाप्नुयात् ७३ यथागुरुक्रतुफलं

नैर्ऋतंसाविशुद्ध्यति २७ भिक्षाग्निकार्यंत्यक्त्वातु सप्तरात्रमनातुरः कामावकीर्णइत्याभ्यांजुहुयादाहुतिद्वयं
२८ मधुमांसाशनेकार्यः कृच्छ्रः शेषव्रतानिच कृच्छ्रत्रयंगुरुः कुर्यात्म्रियेत प्रहितोयदि २९ प्रतिकूलंगुरोः कृत्वा
तंप्रसाद्यैवशुध्यति क्रियमाणोपकारेतुमृतेविप्रेनपातकं ३० महापापोपपापाभ्यांयोभिशंसेन्मृषापरं अब्भक्षोमास
मासीतसजापीनियतेंद्रियः ३१ अभिशस्तोमृषाकृच्छ्रंचरेदाग्नेयमेववा निर्वपेत्पुरोडाशंवायव्यंचरुमेववा ३२ अ
नियुक्तोभ्रातृजायांगच्छेच्चांद्रायणंचरेत् त्रिरात्रांतेघृतंप्राश्यगत्वोदक्यांविशुद्ध्यति ३३ गोष्ठेवसन्ब्रह्मचारीमासमेकं
पयोव्रतः गायत्रीजाप्यनिरतोमुच्यतेऽसत्प्रतिग्रहात् ३४ त्रीन्कृच्छ्रानाचरेद्व्रात्ययाजकोभिचरन्नपि वेदप्लावीयवाश्य
ब्दंत्यक्त्वाचशरणागतं ३५ प्राणायामंचरेत्स्नात्वाखरयानोष्ट्रयानगः नग्नःस्नात्वाचभुक्त्वाचगत्वाचैवदिवास्त्रियं
३६ गुरुंहुंकृत्यत्वंकृत्यविप्रंनिर्जित्यवादतः बध्वावावाससाक्षिप्रंप्रसाद्योपवसेद्दिनं ३७ विप्रदंडोद्यमेकृच्छ्रस्त्वतिकृच्छ्रो
निपातने कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽभ्यंतरशोणिते ३८ देशंकालंवयःशक्तिंपापंचावेक्ष्ययत्नतः प्रायश्चित्तंप्रक

या॰स्मृ॰ दीनि व्रतानि विविधानि च पवित्राण्युपदिष्टानि तृतीयाध्यायसंग्रहे धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात्
४३ कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाः ८५ श्रुत्वैतानृषयो धर्मान्याज्ञवल्क्येन भाषितान् इदमूचुर्महात्मानं यो
गींद्रममितौजसं ८६ य इदं धारयिष्यंति धर्मशास्त्रमतंद्रिताः इह लोके यशः प्राप्य ते च यांति त्रिविष्टपं ८७ विद्यार्थी प्राप्नु
याद्विद्यां धनकामो धनं तथा आयुःकामस्तथैवायुः श्रीकामो महतीं श्रियं ८८ श्लोकत्रयमपि ह्यस्माद्यः श्राद्धे श्रावयि
ष्यति पितॄणां तस्य तृप्तिः स्यादक्षय्या नात्र संशयः ८९ ब्राह्मणः पात्रतां याति क्षत्रियो विजयी भवेत् वैश्यश्च धान्य
धनवानन्यस्य शास्त्रधारणात् ९० य इदं धारयेद्विद्वान धर्मान्पर्वसु पर्वसु अश्वमेधफलं तस्य तद्भवाननुमन्यतां
९१ श्रुत्वैतद्याज्ञवल्क्योऽपि प्रीतात्मा मुनिभाषितं एवमस्त्विति होवाच नमस्कृत्य स्वयंभुवे ९२ इति श्रीयाज्ञवल्की
ये धर्मशास्त्रे तृतीयोऽध्यायः शुभं भवतु छ१वर्षे विकारी संवत् मार्गशीर्षशुद्ध त्रयोदश्यां मंदवासरे कृष्णास्य लि
रव्यते

याज्ञवल्क्योपि॥ यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधतेति अथव्रताधिकारिणः॥ स्कांदे॥ निजवर्णाश्रमाचा
रनिरतः शुद्धमानसः॥ अलुब्धः सत्यवादी च सर्वभूतहिते रतः॥ व्रतेष्वधिकृतो राजन्नन्यथा विफलः श्रमः॥ श्रद्धावान्पा
पभीरुश्च मददंभविवर्जितः॥ पूर्वं निश्चयमाश्रित्य यथावत्कर्मकारकः॥ अवेदनिंदको धीमानधिकारी व्रतादिषु॥
निजवर्णाश्रमाचार इत्यनेन चतुर्वर्णमधिकारो गम्यते॥ अतएव कौर्मे॥ ब्राह्मणा क्षत्रिया वैश्याः शूद्राश्चैव द्विजो
तत्र नवविधपातकानि प्रकाशार्ह स्पकृत ब्रह्महत्यादि महापातकचतुष्टय १ तत्संसर्ग्यादि अतिपातको २ पपातक ३ संकरीकरण ४ मलि
नीकरण ५ पात्रीकरण ६ जातिभ्रंशकर ७ प्रकीर्ण ८ ब्रह्महत्यादि महापातकसाम्योपेतानतिदिष्टपातका ९ नीति। अतिदिष्टपातक
पा० मनुतं क शब्देना त्र ोच्यते। इति पुराणाद्यनुसारेण हेमा [illegible] कः पापानां नवधा विभागः प्रथमः। १। अथ चतुर्विंशति
मतो कोष्टधा पापविभागः। महापातक १ अनुपातको २ पपातक ३ जातिभ्रंशकर ४ संकरीकरण ५ पात्रीकरण ६ मलिनीकरण ७
प्रकीर्णका ८ नीति। २। अथ कौर्मे सा पञ्चोक्तः पातकानां पंचधा विभागः। महापाप १ अतिपाप २ पातक ३ प्रासंगिको ४ पपा
तका ५ नीति। ३। आद्य अतिपातकत्रैविध्यं।

प्राप्नोति स्कस्याहितः विप्रेष्वपि विशेषेण धार्या वाजसनेयकैः इष्टं हि श्रेयसि फलमिहलोके परत्र च यदवाप्तम
माद्देवादादित्याद्दै सनातनात् तद्दल्सर्वमिदंप्रोक्तं श्रुत्यर्थस्मृत्यभीप्सितं निःश्रेयसकरंनृणांशास्त्रं देवर्षिसेवितं ज्ञात्वा
येवद्यध्यवस्यंति तेनसंयाति वैपुनः धर्मप्रश्नस्तथाख्यानं वर्णगर्भादि द्विवाक्रियाः ७४ ब्रह्मचारिविधिश्चैव तथैवाचमनक्रिया
स्नानाग्निकार्यशुश्रूषाव्रतस्वाध्यायसंज्ञिता ७५ गुरोरनुज्ञयास्नानं विवाहश्चरति स्त्रियः पुत्राः संकरजाः कर्म स्नातकानां व्रता
नि च ७६ अध्यायानामुपाकर्म भक्ष्यभोज्यविचारणा द्रव्यशुद्धिर्द्विजातीनांप्रशंसा दानसंज्ञिता ७७ विधिः श्राद्धस्य पितॄणां
तुष्टिर्नानाविधास्तथा विनायकोपशमनं ग्रहाणांशांतिकर्म च ७८ क्रमेणाप्रथमेध्यायेराजधर्मश्च कीर्तितः ऋणादानंतत
श्चाधिस्तथोपनिधिसाक्षिणः ७९ लेख्यंदिव्यानवैभाज्यंसीमायाश्च विधिक्रमः देयंद्रव्यं क्रयो दासास्त्रैविद्यं वेतनं तथा ८०
द्यूतव्याघातकलहाव्याभिश्रं कूटसाक्षिकं मन्नार्पचौरपण्यस्त्रीग्रहणं दुष्टशासनं ८१ द्वितीयाध्यायनिर्दिष्ट एषप्रकरणक्र
मः प्रेतशुद्धिस्तथाख्याता विक्रेयाविक्रयस्तथा ८२ वानप्रस्थपरिव्राजतत्वध्यानविचारणा सुरापाणकृतानांच गर्हिता
त्पत्तिकीर्त्तनं ८३ नरकाणां महापापं तथा चैवोपपापिनी प्रायश्चित्तानि चैतेषां रहस्यानि तथैव च ८४ कृच्छ्रचांद्रायण